इति ॥२३॥ नक्षत्रमिष्ट्वा देवतां यजेत । अहोरात्रमृतुं तिथिं च ॥२४॥ अभिघार्य यद्देवतं हविः स्यात्तच्च[16] जुहुयाद्यथादेवतं यथादेवतया चर्चा ॥२५॥ आकूताय स्वाहा । आकूतये स्वाहेति[17] जयाञ्जुहुयात् ॥ २६ ॥ प्रजापतिः

1 MS II. 7 2 But Gdh ओं परि वाजपति दाशुषे (origin not traced)
2 MS IV 1 12
3 Sh. omits वि.
4. So also MānGr II 2 11, but Sh has ओजो.
5. MS. I 1. 11.
6 Sh °द्रा°.
7. Sh. विरू°. Cf Gdh·
सर्वत· पाणिपादान्त सर्वतो ऽक्षिशिरोमुखा । विश्वरूपो महानग्नि· प्रणीत सर्वकर्मसु ॥ विश्वरूपो नाम नानाप्रकाराग्निः । तस्मै प्रथमो होमः । तं ध्यायेत्.
8. Sh. ब्राह्म°.
9 MS. I. 4. 5.
10. The mss हव्यां.
11 For न वहते Sh reads नह्यति । युक्तो वह. Cf MS I 4. 5 युनज्मि त्वा ब्रह्मणा दैव्येनेति परिधिषु परिधीयमानेषु वदेत् । अग्नेर्वा एष योग. । अग्निमेतद्युनक्ति । युक्तो ऽस्मै हव्यं वहति.
Cf. also KS XXXI. 15 ...अग्नेर्वा एष या(correct यो)ग । ब्रह्मणैवाग्निं युनक्ति । युक्तो ऽस्य हव्यं देवेभ्यो वहति.
12. Sh. F इति हविर्ज्ञा°.
13. Sh. पु°.
14 The mss. सनेमि.
15. Before त्वया F. G. insert त्वा.
16. Sh. omits च.
17. Sh. omits आकूताय स्वाहा.

प्रायच्छत्[1]। इडामग्न[2] इति स्विष्टकृतमुत्तरार्धपूर्वार्धे जुहुयात् ॥ २७ ॥ मेक्षण-मुपयामं पवित्रे चान्वादध्यात् ॥ २८ ॥ अन्वद्य नो अनुमतिः[3]। अन्विदनुमते त्वम्[3] [इति ।] भूः स्वाहेति[4] प्रायश्चित्ताहुतीश्च[5] ॥ २९ ॥ त्वन्नो अग्ने[6]। स त्वन्नो अग्ने[6]। मनो ज्योतिः[7]। त्रयस्त्रिꣳशत्तन्तवः[8]। अयाश्चाग्ने ऽसीति[6] च ॥ ३० ॥

इमꣳ स्तनं मधुमन्तं धयापां प्रपीनमग्ने सलिलस्य मध्ये ।

उत्सं जुषस्व मधुमन्तमूर्मिꣳ समुद्रियꣳ सदनमाविशस्व[9] ॥ स्वाहा ॥

इति परिधिविमोकमभिजुहोति ॥ ३१ ॥ अन्नपत[10] इत्यन्नस्य जुहुयात् ॥ ३२ ॥ एधो ऽस्येधिषीमहि स्वाहेति[11] समिधमादधाति । समिदसि समेधिषीमहीति[11] द्वितीयाम् ॥[12] ३३ ॥ बर्हिषि पूर्णपात्रं निनयेत् ॥ ३४ ॥ एषो ऽवभृथः[13] ॥ ३५ ॥ पाकयज्ञानामेतत्तन्त्रम्[14] ॥ ३६ ॥ आपोहिष्ठीयाभिर्मार्जयित्वा पर्युक्षेत ॥ ३७ ॥ वरो दक्षिणा । अश्वꣳ वरꣳ विद्यात् । गामित्येके ॥ ३८ ॥

इति वाराह[15]गृह्ये प्रथमं खण्डम्[16] ॥

---

1. MS. I. 4. 14.
2. MS II. 7. 11.
3. MS. III. 16. 4.
4. MS. III. 11. 10
5. Gdh. begins the प्रायश्चित्तहोम with भूः स्वाहा.
6. MS. IV. 10. 4.
7. MS. I. 7. 1.
8. MS I. 4. 3.
9. Sh. °विवेश.
   In the VārŚr. ms. p. 127 धायापा प्रपीनमग्ने सलिलस्य and मधुमंतमूर्मिꣳ समुद्रयꣳ सदनमाविवेश have been corrected to धयापा प्रप्यानमग्ने सरिरस्य and मधुमंतमूर्वि समुद्रियꣳ सदनमाविशस्व
10. MS II. 10. 1
11. MS I. 3. 39.
12. Identical with MānGr II. 2. 25
13. Gdh. समाप्तौ क्रियमाणं कर्म अवभृथ-शब्दार्थः.
14. Sh. omits एतत्तन्त्रम्
15. F omits वाराह.
16. For प्रथमं खण्डं Sh. reads प्रथम· खण्डः सम्पूर्णः.

[अथ जातकर्म]

प्राङ्मुखमुदङ्मुखं वा सूतिकालयं कल्पयित्वा ध्रुवं प्रपद्ये शुभं प्रपद्य आशां प्रपद्ये इति काले प्रपादयेत् ॥ १ ॥ रेतो मूत्रमिति[2] च्यावनीभ्यां दक्षिणं[3] कुक्षिमभिमृशेत् । श्रावयेद्वा[4] ॥ २ ॥ पुत्रं जातमन्वक्षं स्नातं न मातोपहन्यादा मन्त्रप्रयोगात्[5] ॥ ३ ॥ अग्नेरभ्याहितस्य परिसमूढस्य परिस्तीर्णस्य पश्चादहते वाससि कुमारं प्राक्शिरसमुत्तानं संवेश्य पलाशस्य मध्यमं पर्णं[6] प्रवेष्ट्य तेनास्य कर्णावाजपेत्[7]—भूस्त्वयि दधानीति[8] दक्षिणे । भुवस्त्वयि दधानीति[8] सव्ये । स्वस्त्वयि दधानीति[8] दक्षिणे । भूर्भुवः स्वस्त्वयि दधानीति[8] सव्ये ॥[9] ४ ॥ अथैनमभिमन्त्रयेते[10]—

अश्मा भव परशुर्भव हिरण्यमस्तृतं[11] भव ।[12]
अङ्गादङ्गात्संभवसि हृदयादधि जायसे ।
आत्मा वै पुत्रनामासि स जीव शरदः शतम् ॥

इति ॥[13] ५ ॥ यत्र शेते तदभिमृशेत्[14]—

वेद ते भूमि हृदयं[15] दिवि चन्द्रमसि श्रितम् ।
वेदामृतस्य देवा माहं पुत्र्यमघं रुदम्[16] ॥

1. Sh. omits आशा प्रपद्ये.
2 MS. III. 11 6.
3 Sh. दक्षिण–
4 Gdh. अथ वा प्रसवाभिमुखीं श्रावयेत्
5 Gdh. जाते पुत्रे पिता सचैलं (v 1 सतैलं) स्नानमाचरेत् । स्नानात्पूर्वमशुचिर्न किं स्पृशेत् । स्नानादूर्ध्वम[–च्छि–]न्नाया नाड्या जातकर्म कुर्यात् Cf PārGr. 1.16 3
6. Sh मध्यमपर्णं, E मध्य पर्णं
7 Gdh पलाशस्य मध्यपर्णं कर्णे [कर्णयो· ?] संवेष्ट्य कर्णौ पिधाय जपति Cf. Bhār-Gr. I 24. मध्यमं पलाशपलाशं संवेष्ट्य तेनास्य दक्षिण कर्णमाजपति॰.
8. All the Sūtra mss except F. read दधामि. Gdh. दधाति, but in Dantodgamana दधानि.
9 Cf. MānGr I 17. 6.
10. Sh ॰येत्, E. Gdh ॰यते.
11 The mss. variously ॰श्रितं ॰श्रत, स्त्वितं.
12 A adds वेदो वै पुत्रनामासि स जीव शरद शतम् (But not in Gdh)
13 Cf. MānGr I 17 5, 18 6.
14 Cf PārGr 1. 16 17 स यस्मिन् देशे जातो भवति तमभिमन्त्रयते, HirGr II 3 8 तत पाणी प्रक्षाल्य भूमिमालभते But Gdh वेद ते इत्यस्य नाभिर्देवता, नाभिस्पर्शने विनियोग ,
15 Sh. F. भूमिर्हृ॰.
16 Sh. G Gdh पुत्रमहं हृदम्, E.F पुत्रमगं

इति ॥ ६ ॥ आज्यꣳसꣳस्कृत्य ब्रह्माणमामन्त्र्य समिधमाधायाघारा-वाघारावाज्यभागौ हुत्वा व्याहृतिभिश्चतस्र आज्याहुतीर्जुहुयात् । जयाभ्याता-नानाꣳ राष्ट्रभृतश्चैके[2] ॥ ७ ॥ काꣳस्ये चमसे वा ऽऽहुतिसंपातानवनीय तस्मिन्सुवर्णꣳ संनिघृष्य व्याहृतिभिः कुमारं चतुः प्राशयेत्[3] । अत्यन्तमेके सुवर्णप्राशनमुदके निघृष्याऽऽ द्वादशवर्षतायाः ॥[4] ८ ॥ इष पिन्व । ऊर्जं पिन्वेति स्तनौ [प्रक्षाल्य] प्रधापयेत्[5] । दक्षिणं पूर्वꣳ सव्यं पश्चात् ॥[6] ९ ॥ स्विष्टकृते[7] हुत्वा प्रायश्चित्ताहुतीश्च समिधमाधाय पर्युक्षति ॥ १० ॥ एष कर्मान्तो बहिर्द्वारे ऽग्निर्नित्यः । कणसर्षपयवानाꣳहोमः । व्याहृतिभिर्जुहुयात् ॥[8] ११ ॥ अप्रतिरथं[9] जपेत् । इन्द्रो भूतस्येति[10] षडर्चं[11] च ॥ १२ ॥ सूतिका-लयꣳ यथाकालꣳ समन्तादुदकेन परिषिञ्चेत् ॥ १३ ॥

इति वाराहगृह्ये द्वितीयं खण्डम्[12] ॥

हृदम्
Ms. F the best of our lot, supported by ms E. suggests that the reading as emended above is the original one Instead of अघं रुदं it reads अगं हृदं i. e. the aspiration in घं has been transferred to रु, which in its aspirated form हु was written down as हृ, the pronunciation of रु being identical with ऋ in Western India, to which locality all these mss. belong. The writer could conceive of no such written word as हुदम्. In the other mss. अगं was further emended to अहं.

1. Sh आह्म०.

2. Gdh. राष्ट्रप्रभृत०

3. Gdh. व्याहृतीनां ...मेधाजनने विनियोगः। दक्षिणानामिकया सुवर्णान्तर्हितया कुमारं चतु प्राशयति १ ओं भूस्त्वयि प्राशय-[-मी-]ति । एवमायुष्करणं कुर्यात् । द्वादशवर्षं यावदेव भवेत्प्राशनमिति

4 Cf MānGr I 17 4

5 Gdh ओमिषं पिन्वेत्यनेन दक्षिण स्तन प्रक्षाल्य तूष्णीं प्रधापनम् । ओमूर्जं पिन्वे-त्यनेन [सव्य] स्तन प्रक्षाल्य [तूष्णीं] प्रधापनम्

6. Cf. MānGr I 17 7

7 Sh ०कृतं.

8 Gdh. सूतिकाबहिर्द्वार्येग्निं नित्यं भूस-स्कारमात्रं कृत्वा सस्थाप्य समित्प्रक्षेपपूर्वक कणसर्षपद्रव्येण सायं प्रात व्याहृतिभिर्होम कुर्यात्

9. Gdh आशु शिशान. (MS II. 10 4) इत्यप्रतिरथम्

10. MS IV. 14 7.

11. E. षडृचं, G. षडरुच

12. Sh. ०गृह्यसूत्रे प्रथम खण्ड , E. ०प्रथमं खण्डम्, F. गृह्ये०, G. वाराहसूत्रे गृह्ये०.

[अथ नामकरणम्]

एवमेव दशम्यां कृत्वा पिता माता च पुत्रस्य नाम दध्याताम्[1]—घोषवदाद्यन्तरन्तस्थं, दीर्घाभिनिष्टानान्तं, कृतं, न तद्धितं, द्व्यक्षरं चतुरक्षरं[2] वा[3], त्यक्त्वा पितुर्नामधेयार्द्, नक्षत्रदेवतेष्टनामानो वा ॥[4] १ ॥ द्विनामा तु ब्राह्मणः ॥ २ ॥ नामैव कन्यायाः—अकारव्यवधानमाकारान्तमयुग्माक्षरं नदीनक्षत्रचन्द्रसूर्यपूर्षदेवदत्तरक्षितावर्जम् ॥[8] ३ ॥ नवनीतेन पाणी[9] प्रलिप्य सोमस्य त्वा द्युम्नेनेत्येनमभिमृशेत् ॥ ४ ॥ सर्वेषु कुमारकर्मस्वाग्नेयः स्थालीपाकः प्राजापत्यो वा ॥ ५ ॥ सर्वत्रानादेशे ऽग्निः पुंसामर्यमा स्त्रीणाम् ॥[11] ६ ॥ संवत्सरं मातापितरौ न मांसमश्नीयाताम् ॥[12] ७ ॥

1 Gdh अग्ने पश्चात् माताङ्के पुत्रं गृहीत्वा उपविशेत् । उभौ वा । तयोरभावे भ्राताऽन्यो वा

2 Sh ०ष्ठा० So also Baudh (II 1 26), Pār (I 17 2) and Hır (II 4 10) Grhyasūtras But Samskāraratnamālā considers ıt to be a corrupt reading अभिनिष्ठान इति तु प्रमादपाठ· (Ānandāśrama edıt p 853-854)

3 Gdh विजे [बीज or बैज] वाप —पिता नाम करोति एकाक्षरं द्व्यक्षरं त्र्यक्षरं वा । चतुरक्षरमपरिमितं चेति.
Baudh (II. 1 27) and other Grhyasūtras cıte a vıjñāyate-passage अपि वा यस्मिन् स्वित्युपसर्गं स्यात् तद्धि प्रतिष्ठितमिति विज्ञायते

4. Sh. त्यक्तपितृनामधेयात्.
G. त्यक्त्वा पितृनामधेयं So also MānGr I 18 2
In mss E F and others the use of the ablatıve '०नामधेयात्' after त्यक्त्वा ıs analogous to the one ın relatıon wıth the synonymous विना or ऋते. Wıth this passage may be compared the त्रिपुरुषानूक of a very ancıent author quoted by Patañjalı (Mbh I 1 1) याज्ञिका पठन्ति—दशम्युत्तरकाल पुत्रस्य जातस्य नाम विदध्यात् अवृद्धं त्रिपुरुषानूकमनरिप्रतिष्ठित Gopīnātha (Samskāraratnamālā, Ānandāsrama edıt p 855) explaıns ıt thus नामकर्तुस्त्रिपुरुषान् पितामहादीननुकायत्यभिधत्त इति त्रिपुरुषानूकम् । पितामहादित्रितयान्यतम नाम कार्यमित्यर्थः.

5 Cf MānGr I 18 1, 2

6 Sh. E. G ०षा०

7. G ०ता[त्ता]०.

8. Cf. MānGr I 18 1

9 E G. ०णि

10 MS II 6 11

11. Cf MānGr II 10. 8.

12 Henceforth Sh E G begın a fresh chapter The colophons for thıs chapter are
Sh इति वाराहगृह्ये द्वितीय खण्ड, E. इति वाराहगृह्ये द्वितीयं खण्डम्, G द्वितीयं
After नामकरण Gdh ıntroduces two more rıtes, vız. निष्क्रमण and

[अथ दन्तोद्गमनं पुत्राभिमन्त्रणं च]

पुत्रस्य जातदन्ते[1] यजेताग्निं गवा पशुना वा ॥ ८ ॥ विप्रोषितः प्रत्येत्य पुत्रस्य मूर्धानं त्रिराजिघ्रेत्—पशूनां त्वा हिङ्कारेणाभिजिघ्रामीति ॥[3] ९ ॥ जातकर्मवद्धस्ताङ्गुलिं[4] प्रवेष्टय तेनास्य कर्णावाजपेत् ॥ १० ॥ अथैनमभिमन्त्रयते—अश्मा भवेति ॥ ११ ॥

[अथान्नप्राशनम्]

अग्निधन्वन्तरी पुत्रवती छागमेषाभ्यामिष्ट्वा दीर्घाणा[?] व्याहृतिभिः कुमारं चतुः प्राशयेत् । आयुर्दा देवेति[5] च ॥[6] १२ ॥

[अथ सामान्यनियमाः[7]]

कुमारकर्माणि शुक्ल उदगयने पुण्ये[8] नक्षत्रे नवमीवर्जम् । सर्वे ऋतवो विवाहे ऽमाघचैत्रौ मासौ, परिहाप्योत्तरं च नैदाघम् ॥ १३ ॥ अन्वारम्भयित्वा हवनम् ॥ १४ ॥

इति वाराहगृह्ये तृतीयं खण्डम्[10] ॥

कर्णवेध

1. Sh जाते दन्ते
2. Sh. ऽप॰. Cf. MānGr II. 9 11.
3. Cf. MānGr I. 18 6.
4. Sh. ॰लीं.
5 MS. IV 12 4
6 Gdh. मधुरादीन्रसानादायान्यत्सर्वमन्तर्वर्णादि भाजन उद्धृत्य मातुरुत्सङ्गे स्थितं कुमारं कनकहस्त. पिता कुलदेवतासन्निधौ तां स्मृत्वा वा मधुशर्कराज्यसयुक्तं हन्त इति व्याहृतिभिः प्राशयेत् ।. एतदनन्तरं धनशास्त्रवस्त्रादि संस्थाप्य तत्र कुमारं मातोत्सृजेत् । प्रथमं यत्स्पृशेत् तेनास्य जीविका ज्ञातव्या.
7. Gdh. includes the 13th and the 14th sūtra in the following ceremony, viz. चूडाकरण.
8 Sh G ॰ण्ये. Cf MānGr I 21. 1.
9 For अमाघ॰ Sh. G read माघ॰. अमाघ here stands for पौष, as Gdh. explains it प्रावृट्शरदौ पौषचैत्रे वर्जयित्वा. Cf ĀpGr I 2. 12 सर्वे ऋतवो विवाहस्य शैशिरौ मासौ परिहाप्योत्तमं च नैदाघम्. Cf also BaudhGr. I 1 18, 19 सर्वे मासा विवाहस्य ॥ शुचितपस्तपस्यवर्जमित्येके, and BaudhGr Paribhāshāsūtra I. 2 13 सवत्सरो वै देवानामहोरात्रम् । तस्यैतदुदगयनमहः । . तस्य प्रात सङ्गवौ शिशिरवसन्तौ ॥ मध्यन्दिनं ग्रीष्म । अपराह्णसायाह्ने वर्षाशरदौ । प्रात सङ्गवे सायमिति विवाहं न कुर्वन्ति.
10. Sh. ॰तृतीय खण्डः, E G. वाराह॰, F. गृह्ये॰.

[अथ चूडाकरणम्]

तृतीयवर्षस्य जटाः कुर्वन्ति । यथा वा कुलकल्पः ॥[1] १ ॥ अग्निमुपसमाधाय परिसमुह्य परिस्तीर्य[2] पर्युक्ष्य दक्षिणतोऽग्नेर्ब्रह्माणमुपवेश्योत्तरत[3] उदपात्र[4]ꣳ शमीशमकवत्[5] ॥ २ ॥ अथैनमभिमन्त्रयते — हिरण्यवर्णाः शुचय[6] इति चतसृभिः । या ओषधय[7] इत्यनुवाकेन ।

शं नो देवीरभिष्टय आपो भवन्तु पीतये ।

शꣳयोरभि स्रवन्तु नः ॥

प्रियाः[8] श न आपो धन्वन्याः शं नः सन्तु नूप्याः ।

शं नः समुद्रिया आपः शमु नः सन्तु कूप्याः ॥

शं नो मित्रः शꣳ वरुणः शं नो भवत्वर्यमा ।

शं न इन्द्रश्चाग्निश्च शं नो विष्णुरुरुक्रमः ॥

इति[10] । तासामुदकार्थान्कुर्वीत—पर्युक्षणेऽभ्युन्दने स्नापने च ॥ ३ ॥ आज्यꣳ सꣳस्कृत्य ब्रह्माणमामन्त्र्य समिधमाधायाघारावाघार्याज्यभागौ हुत्वा—अग्न आयूꣳषि पवस[11] इति सप्तभिः सप्त हुत्वा[12] ॥ ४ ॥ आयुर्दा देवेति[13] च ।

ये केशिनः प्रथमे सत्त्रमासते[14] येभिरावृतꣳ यदिदꣳ विराजति ।

तेभ्यो जुहोम्यायुषे दीर्घायुत्वाय स्वस्तये ॥

1 Cf MānGr I 21 1

2 Sh. places पर्युक्ष्य before परिस्तीर्य

3. Sh. ब्राह्म०.

4 Sh E G उदक०

5. For शमीशमकवत् G has शमिशमकपात्र शमिशमकवद्

6 MS. II 13 1

7 MS. II. 7 13

8 AV. I 6 4, KS II 1, MānŚr VI 1 5 omit प्रिया

9. AV. (ib.), KS (ib.) and MānŚr (ib.) read सन्त्वनू०

10. Sh. does not give these three verses sakalapāthena, but gives only the pratikas शं नो देवीरभिष्टय इति श न आपो धन्वन्या इति द्वाभ्याम् इति च Gdh उदकपात्र शमीशमकवत् प्रतिष्ठाप्य हिरण्यवर्णा इति चतसृणा चतस्र, या ओषधय, [प्रिया शन्न], शन्नो मित्र इत्येषा कुम्भाभिमन्त्रणे विनियोग

11 MS I 3 31 Gdh Vas पवसा, thus following the MS rule of sandhi

12 Sh. जुहुयात्, E adds जुहुयात्.

13. MS IV 12 4

14 E Vas ०ते

इति ॥ ५ ॥ व्याहृतिभिश्च ॥ ६ ॥ उक्तः कर्मान्तः पूर्वेण ॥ ७ ॥ शीतेन वायं उदकेनेधि । उष्णेन वायं उदकेनेधीति तप्ता इतराभिः संसृज्य— आर्द्रदानव स्थ जीवदानव स्थोन्दतीरिषमावदेत्यपो ऽभिमन्त्र्य दक्षिणं केशान्तमभ्युन्द्यात्—

अदितिः केशान्वपत्वाप उन्दन्तु जीवसे । दीर्घायुत्वाय स्वस्तये ॥

इति ॥ ८ ॥ दक्षिणस्मिन्केशान्ते दर्भमूर्ध्वाग्रं निदधाति ॥ ९ ॥ ओषधे त्रायस्वैनमिति दर्भमन्तर्दधाति ॥ १० ॥ स्वधिते मैनं हिंसीरिति क्षुरेणाभिनिदधाति ॥ ११ ॥

येनावपत्सविता क्षुरेण सोमस्य राज्ञो वरुणस्य विद्वान् ।

तेन ब्रह्मणो वपतेदमस्यायुष्मानयं जरदष्टिर्यथासत् ॥ असौ ॥

इति प्रवपति ॥ १२ ॥ दक्षिणतो माताऽन्या वाऽविधवाऽऽनडुहेन गोमयेनाऽभूमिगतान्केशान्परिगृह्णीयात् ॥ १३ ॥

मा ते केशाननुगाद्वर्च एतत्तथा धाता दधातु ते ।

तुभ्यमिन्द्रो वरुणो बृहस्पतिः सविता वर्च आदधुः ॥

इति प्रपततो ऽनुमन्त्रयते ॥ १४ ॥ तेन धर्मेण पुनरपो ऽभिमन्त्र्यापरं केशान्तमभ्युन्द्यादुत्तरं च ॥ १५ ॥ अन्यौ तु प्रवपनौ—

1 Gdh Vas ततो जयादिव्याहृतिहोम पूर्ववत्कार्यः.

2. The mss वा

3 Thus the text mss., the Paddhatis ०मावदेदि० The original was probably ०मावहते०.

4 Sh. puts दक्षिण केशान्तमभ्युन्दति at the end of the sūtra.

5. Cf. MānGr I 21 2, 3

6. Sh. omits दक्षिणस्मिन् . निदधाति

7. MS. III. 9 3.

8. Sh. adds दक्षिणस्मिन् केशान्ते ऊर्ध्वाग्रं

9 Cf. MānGṛ. I. 21. 4.

10. Cf. MānGṛ. I. 21. 5.

11. E. Gdh. (v. l.) Vas. ब्रह्म०, G. ब्राह्म०.

12 Vas अहममुकशर्माऽमुकगोत्रस्तव केशान् वपामीत्युक्त्वा पूर्वमंत्रं पठन्वपेत्.

13 Cf. MānGr I 21 6.

14 Sh गोमयेन आभू०, Sh (v l) E. G ०येन भू० Cf Gdh Vas. भूमिस्पर्शरहितान्.

15. Cf MānGr I. 21 9.

16 So also KāṭhGṛ XL 13, and the Paddhatis पततः केशानभिमन्त्रयते (Vas. ०येत्).

Sh. E. G प्रवपतो. So also the Mān. (I. 21. 8) and Baudh. (II. 4 14) Gṛhyas Thus also BaudhŚr. XVIII. 19.

17. Cf. MānGr. I. 21. 8.

येन पूषा बृहस्पतेरग्नेरिन्द्रस्य चायुषे ऽवपत् ।
तेन ते वपाम्यायुषे दीर्घायुत्वाय स्वस्तये ॥

इति पश्चात् ।

येन भूयश्चरत्ययं ज्योक्च पश्यसि[1] सूर्यम् ।
तेन ते वपाम्यायुषे दीर्घायुत्वाय सुश्लोक्याय सुवर्चसे ॥

इत्युत्तरतः ॥[2] १६ ॥

यत्क्षुरेण पर्चयता सुपेशसा वप्तर्वपसि केशान् ।
शुन्ध शिरो[3] मास्यायुः प्रमोषीः ॥

इति लोहायसं क्षुरं केशवापाय प्रयच्छति ॥[4] १७ ॥ यथार्थं केशयत्नान् कुर्वन्ति—दक्षिणतः कपर्दा[5] वसिष्ठानामुभयतो ऽत्रिभार्गवकाश्यपानां, पञ्चचूडा आङ्गिरसः[6], शिखिनो ऽन्ये[7] ॥ १८ ॥ वाजिमेके मङ्गलार्थम् ॥[8] १९ ॥

त्र्यायुषं कश्यपस्य जमदग्नेस्त्र्यायुषमगस्त्यस्य[10] त्र्यायुषम् ।
यद्देवानां त्र्यायुषं तन्मे अस्तु शतायुषम् ॥

इति शिरः संमृशति ॥ २० ॥ परिगृह्य गोमयेन केशानुत्तरपूर्वस्यां गृहस्य मूष्यामन्तरा गेहात्पल्वदं च[11] निदध्यात् । अरिक्ते[12] वा वपने[13] ।

1 Sh. G. Vas ०ति

2. Cf MānGr. I 21 6

3. Except F all the text and Paddhati mss. insert मुख after शिरो. This insertion is not very appropriate for the tonsure of a three years old child, he has neither beard nor moustaches. The MānGr (I 21 14) explicitly ordains that the word मुखं be inserted in the verse under question only when it is used for the Godāna

4. Cf MānGr I. 21. 7

5. Sh. ०र्दो.

6. Sh. ०चूडाङ्गिरसा.

7. Gdh. अन्येषामेकैव। ता यत्र क्वचन कुर्वन्ति

8 For शिखिनो ऽन्ये (sūtra 18) and वाजि० A reads शिखान्येषामेकेति

9. Cf KāthGr XL. 7 मङ्गलार्थं शिखिनो ऽन्ये and on it the Vivarana of Ādityadarśana अमेध्यं वा एतच्छिरो यदशिखम्. Cf also Samskārakaustubha p. 115b वाजिं ललाटकर्णमूलस्पर्शिनीं मालामिव केशपंक्तिं मंगलार्थं कुर्वन्ति

10 Sh. त्र्यायुषं जमदग्नेः कश्यपस्य.

11 Sh. omits च.

12 Sh E. (sec m sup lin.) G. अति०, A. अरिक्तेन.

13 Vas. गृहस्येशानदिग्भागे गर्तायां निदध्यात् । गेहाभ्यन्तरा गर्ते वा । अरिक्ते वा पूर्णे भाण्डे निक्षिपेत्.

उप्त्वाय केशान्वरुणाय[1] राज्ञो बृहस्पतिः सविता विष्णुरिन्द्रः ।

तेभ्यो निधानं महदन्वविन्दन्नन्तरा द्यावापृथिवी अप स्वः[2] ॥

इति ॥[3] २१ ॥ कर्त्रे वरं ददाति ॥[4] २२ ॥ पञ्चमगुणं तिलपिशितं च केशवापाय प्रयच्छति ॥[5] २३ ॥ संवत्सरं माता नाम्लाय धारयेत् । रोषाय नाश्नीयात् । लवणवर्जं तूष्णीम् ॥ २४ ॥ कन्याया आहुतिवर्जम् ॥ २५ ॥ विदुषो ब्राह्मणानर्थसिद्धिं वाचयेत् ॥ २६ ॥ एवमुत्तरेषु ॥ २७ ॥

इति वाराहगृह्ये चतुर्थं खण्डम्[5] ॥

[अथोपनयनम्]

गर्भाष्टमेषु[6] ब्राह्मणमुपनयेत् । षष्ठे सप्तमे पञ्चमे वा ॥[7] १ ॥ ततो गर्भैकादशेषु क्षत्रियं, गर्भद्वादशेषु वैश्यम् ॥ २ ॥ प्राक्षोडशाद्वर्षाद्[8] ब्राह्मणस्यापतिता सावित्री, द्वाविंशात्[9]क्षत्रियस्य, चतुर्विंशाद्वैश्यस्य[10] । अत ऊर्ध्वं पतितसावित्रिका भवन्ति । नैनान्याजयेयुर्नाध्यापयेयुर्न विवहेयुर्न विवाहयेयुः[11] ॥ ३ ॥ अभ्यन्तरं जटाकरणं बहिरुपनयनम् ॥ ४ ॥ उक्तो ऽग्निसंस्कारो ब्रह्मणश्च[12][13] ॥ ५ ॥ कुमारं[14] पर्युप्तिनं स्नातमभ्यक्तशिरसमुपस्पर्शनकल्पे-

1 Sh ०णस्य

2. Sh. ०पृथिव्योरवन्तु ,Sh (v l) ०पृथिवी अप्सु, E. Gdh ०पृथिवी अप्स्व G. Vas. पृथिवी अप्सु ,

3 Cf MānGr I 21 10

4 Cf MānGr I 21 12

5 Sh ०चतुर्थं खण्ड , E. वाराह०, F गृह्ये०, G गृहे तृतीय.

6 Sh ०ष्टमे

7. Cf. MānGr. I 22. 1

8. Sh. आद्विंशात्, E. आ द्वा०.

9 Excepting G other mss आ चतु०

10 Sh ०त्री०

11 Sh omits न विवाहयेयु

12 G ब्रा०

13 Sh E read ब्राह्मणस्य and join it to कुमार in the next sūtra, but the ceremony that follows is nowhere ordained to pertain to a Brāhmana kumāra alone

14. After कुमा one leaf is missing in F upto ०मसावितित (sūtra 17).

नोपस्पृष्टमग्नेर्[1]दक्षिणतो ऽवस्थाप्य दधिक्राव्णो अकारिषमिति[2] दध्नः कुमारं[3] त्रिः प्राशयेत् ॥[4] ६ ॥

ईयं[5] दुरुक्तात्परिबाधमाना वर्णं[6] पवित्रं पुनती न आगात् ।
प्राणापानाभ्यां बलमाभजन्ती शिवा देवी सुभगा मेखलेयम् ॥
ऋतस्य गोप्त्री तपसस्तरुत्री[7] घ्नती रक्षः सहमाना अरातीः ।
सा मा समन्तमनुपर्येहि भद्रे धर्तारस्ते सुभगे मेखले मा रिषाम ॥

इति मौञ्जीं त्रिगुणां त्रिः परिवीतां मेखलामाबध्नीते[8] । मौर्वी धनुर्ज्या क्षत्रियस्य, शाणी[9] वैश्यस्य ॥[9] ७ ॥ उपवीतमसि यज्ञस्य त्वोपवीतेनोपव्ययामीति[10] यज्ञोपवीतम्[11] ॥ ८ ॥

या अकृन्तन्[12] अतन्वन्या अवायन्या अवाहरन् ।
याश्चाग्ना[13] देवीरन्तानभितो[14] ऽतन्वत[15] (?) तास्त्वा[16] देवीर्जरसे संव्ययन्ताम्[17] ॥
आयुष्मानयं परिधत्त[18] वासः परिधत्त वर्चः ।

1 E inserts कुमारं before अग्ने, G omits अग्ने

2 MS I 5 1 Before the verse E G insert दधिक्राव्णो अकारिषमिति वामदेव ऋषि त्रिष्टुप्छन्द सुरभिर्देवता, दधिप्राशने विनियोग These details are neither completely supplied by Gdh nor by Vas

3 For दध्न कुमार Sh reads कुमार दधि

4. Cf. MānGr. I 22 3

5 Before this verse E G read इय दुरिक्तादिति, [ऋतस्य] गोप्त्री [इति] द्वयोर्मन्त्रयो वामदेव ऋषि त्रिष्टुप्छन्द मेखला मरुतो देवता मेखलाबन्धने विनियोग

6 The mss. वरुणां.

7 Sh तपसश्चरित्री, E ०स्तरत्री, G Gdh Vas ०स्तरित्री

8 Sh. ०त.

9. Cf MānGr I 22 7, 8, 10

10 After this verse E G add यज्ञोपवीतमिति मन्त्रस्य परमेष्ठी प्रजापति ऋषि यज्ञोपवीतं परमं पवित्रं यज्ञोपवीत बलमस्तु तेज (The last verse is not given by Gdh)

11 E G omit यज्ञोपवीतम्

12 Sh ०न्तं०

13 Other variants suggest ०न्न्या

14 Sh here and next pāda देव्यो

15 The mss suggest ततन्थ.

16 Only Sh तास्त्वा, other mss तास्ता

17 Sh सव्ययन्तु
After संव्ययन्ता Vas adds इति कटिसूत्र । तत वस्त्र । आयुष्मान् इत्येतयो मन्त्रयो वस्त्रपरिधाने विनियोग In E the particulars beginning with आयुष्मान् have been added on the margin by a late hand

18 Sh आयुष्मन्निद परिधत्स्व

शतायुषं कृणुहि दीर्घमायुः[1] ॥

शतं च[2] जीव शरदः पुरूचीर्वसूनि चार्‍यो[3] विभजाय जीयान्[4] (?) ॥[5]

इत्यहतꣳ वास आच्छाद्य

मित्रस्यꣳ चक्षुर्धरुणं बलीयस्तेजो यशस्वि स्थविरं च धृष्णु ।

अनाहनस्यꣳ वसनं चरिष्णुं परीदꣳ वाज्यꣳ वाजिनं[11] दधे ऽहम् ॥

इति कृष्णाजिनं च[12] ॥[13] ९ ॥ आज्यꣳ सꣳस्कृत्य ब्रह्माणमामन्त्र्य समिधमाधायाघारावाघार्याज्यभागौ हुत्वाऽष्टौ जटाकरणीयान्जुहुयात् ॥ १० ॥ व्याहृतिभिश्च ॥ ११ ॥ उक्तः कर्मान्तः पूर्वेण ॥ १२ ॥ कालाय[14] वां गोत्राय वां जैत्राय वामौद्भेत्राय वामन्नाद्याय वामवनेनिजेदि[15]त्युदकेनाञ्जलिं पूरयित्वा[16] सुकृताय वामिति[17] पाणी प्रक्षाल्य इदमहं[18] दुर्यमन्या निष्प्लावयामीत्याचम्य निष्ठीवति ॥ १३ ॥ भ्रातृव्याणाꣳ सपत्नानामहं भूयासमुत्तम इति द्वितीयम् ॥ १४ ॥

प्रातर्जितं[18] भगमुग्रꣳ हुवेम वयं पुत्रमदितेर्यो विधर्ता ।

आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीमहीत्याह ॥

इत्यादित्यमुपतिष्ठेत ॥ १५ ॥ ब्रह्मचर्यमुपागामुप मा ह्वयस्वेति ब्रूयात् ॥१६॥ एहि ब्रह्मोपेहि ब्रह्म ब्रह्म त्वा स ब्रह्म[19] सन्तमुपनयाम्यहमसाविति ॥ १७ ॥ अथास्याभिवादनीयं नाम गृह्णाति ॥[20] १८ ॥ देवस्य ते[21] सवितुः प्रसवे ऽश्वि-

1. Sh omits कृणुहि, E has दीर्घायुत्वा
2. Gdh omits च.
3. G Vas, चाज्यो, Gdh चामौ.
4. Gdh, जीयात्
5. Vas, शतं च जीवेत्यधिवास दद्यात्.
6 E. (margin sec. m.) G supply the ऋष्यादि and विनियोगान्त details first
7. Sh. ०रु०, and further omits च.
8. Sh. समिद्धं (v 1 दिष्ठ्यं), G. धिष्ण्यं.
9 All the mss. आ०.
10. Sh. जरिष्णुं, B. च शुष्मं, G चरुष्णुं.
11. For वाज्यं वाजिनं Sh. reads वाज्यजिनं.
12 E. G. omit इति कृष्णाजिनं च, though they have कृष्णाजिनधारणे विनियोग Gdh Vas omit मित्रस्य चक्षु कृष्णाजिनं च.
13 Cf MānGr I 22 3
14 Sh ब्राह्म०.
15 Sh ०निजेमी०
16. E. G omit इत्यु० पूरयित्वा
17 MS I, 1 4
18. Gdh, ततो
19 Sh, Gdh, सं ब्रह्म, Vas omits स ब्रह्म
20. Cf. MānGr I 22 5
21. Sh. G Vas त्वा.

नोर्बाहुभ्यां पूष्णो हस्ताभ्याᳪ[1] हस्तं गृह्णाम्यहमसावित्यस्य हस्तं दक्षिणेन दक्षिणमुत्तानमभीवाङ्गुष्ठमभीव लोमानि[2] गृह्णीयात् ॥[3] १९ ॥

मामेवान्वेतु[4] ते मनो मामेवापि त्वमन्विहि ।

अग्नौ घृतमिव दीप्यताᳪ हृदयं तव यन्मयि ॥

इत्येनं प्रेक्षमाणᳪ[5] समीक्षते ॥ २० ॥ पृष्ठतो ऽस्य पाणिमन्ववहृत्य[6] हृदयदेशमन्वारभ्य जपेत्[7]—प्राणानां ग्रन्थिरसि[8] मा विस्रसदिति । ब्रह्मणो ग्रन्थिरसीति नाभिदेशम् ॥[10] २१ ॥

गणानां त्वा गणपतिᳪ हवामहे[11] कविं कवीनामुपमश्रवस्तमम्[12] ।

ज्येष्ठराजं ब्रह्माण[13] ब्रह्मणस्पत आ नः कृण्वन्नूतिभिः[14] सीद सादनम् ॥

इति प्रदक्षिणमग्निं परिणयेत् ॥ २२ ॥ पश्चादग्नेर्दर्भेषूपविशति दक्षिणतश्च ब्रह्मचारी ॥ २३ ॥ अधीहि भो इत्युपविश्य जपति ॥ २४ ॥ प्रभुज्य दक्षिणं जानुं पाणी संधाय दर्भहस्तावोमित्युक्त्वा व्याहृतीः सावित्रीं चानुब्रूयात् । एवं काण्डानुवचनेषु ॥[15] २५ ॥ तत्सवितुर्वरेण्यमिति[16] गायत्रीं ब्राह्मणाय । आ देवो यातु[17] सविता सुरत्न[18] इति त्रिष्टुभं क्षत्रियाय । युञ्जते मन[19] इति जगतीᳪ वैश्याय । पच्छो ऽर्धर्चशः सर्वामन्ततः ॥ २६ ॥ पालाशं दण्डं ब्राह्मणाय प्रयच्छति, नैयग्रोधं क्षत्रियायाश्वत्थᳪ वैश्याय । सुश्रवः[4] सुश्रवसं मां कुरु । यथा त्वᳪ सुश्रवः सुश्रवा अस्येवमहᳪ[20] सुश्रवः सुश्रवा भूयासम् ।

1. For देवस्य ते हस्ताभ्या Sh reads देवस्य त्वेति (MS. I 1 2)
2. Sh ॰माभि वाङ्गुष्ठमभि वा लोमानि, A E ॰मभिवलोमानि नाम, G Gdh Vas मभिवाङ्गुष्ठमभिव लोमानि (Gdh लोमान)
3. Cf MānGr I 22 5
4. E. (margin sec m) and G give the ऋष्यादि and विनियोगान्त details first.
5. Sh. E. G संप्रे॰
6. Sh. E. G. ॰मन्वाहृ॰
7. Sh जपति.
8. Sh. adds ते
9. Thus Gdh, other mss. ॰स्रंस॰
10. Cf MānGr. I 22. 6.
11. G. adds निधीना त्वा निधिपतिᳪ हवामहे.
12. Some mss उप मयि for उपम.
13. Sh ब्रह्मणा. So also RV II 23 1
14. Sh शृ॰ So also RV ib.
15. Cf. MānGr I 22. 13.
16. MS IV. 10. 3.
17. Sh E. G. याति.
18. MS IV 14. 6.
19. MS. I. 2. 9.
20. G. adds मनुष्याणां.

यथा त्वं देवानाऽ वेदस्य निधिगोपो ऽस्येवमहं मनुष्याणां ब्रह्मणो निधिगोपो भूयासमिति[1] प्रतिगृह्णाति[2] ॥[3] २७ ॥ ऊर्ध्वकपालो ब्राह्मणस्य कमण्डलुः, परिमण्डलः क्षत्रियस्य, निचल्कलो[4] वैश्यस्य ।

इमा आपः[5] प्रभराम्ययक्ष्मा[6] यक्ष्मचातनीः ।

ऋतेनापः प्रभराम्यमृतेन सहायुषा ॥

इति प्रतिगृह्णामीति प्रतिगृह्य भैक्ष्यं[7]चर्यं चरेत् – भवति[8] भिक्षां देहीति ब्राह्मणः, भवतिमध्यां क्षत्रियः, भवत्यन्त्याऽ[9] वैश्यः । चतस्रः षडष्टौ वाऽविधवा अप्रत्याख्यायिन्यः । मातरं प्रथममेके ॥[10] २८ ॥ गुरवे निवेद्य[11] ॥ २९ ॥ वाग्यतः प्राग्ग्रामात्संध्यामासेत[12] । तिष्ठन्पूर्वाम् । सावित्रीं त्रिरधीत्य

अध्वनामध्वपते[13] स्वस्त्यस्याध्वनः पारमशीय ॥[14]

या मेधा अप्सरःसु गन्धर्वेषु च यन्मनः ।

या मेधा दैवी मानुषी[15] सा मामाविशतामिहे[16] ॥

इति[17] ॥[18] ३० ॥ प्रत्येत्याग्निं परिचरेत् । इमऽ स्तोममर्हत[19] इति परिसमूहेत् । एधो ऽस्येधिषीमहीति[20] समिधमादधाति । समिदसि समेधिषीमहीति[20]

1 Sh E G add दण्डं

2. G. प्रतिगृह्णामि [इति] प्रतिगृह्य (Cf. प्रतिगृह्णामीति प्रतिगृह्य in the next sūtra)

3 Cf. MānGr I 22 17

4 Sh ०चलकलो, B ०चलको.

5 E. (margin sec m) and G give the ऋष्यादि and विनियोगान्त details first

6 Sh ०यक्ष्माय, E. F ०यक्ष्म्या.

7. G. ०क्षु०.

8. In Sh E. G. भवति is preceded by ऊँ०.

9. Sh. E. G. ०न्तां.

10. Cf. MānGr. I. 22. 20.

11. Vas. भिक्षां गुरवे निवेदयति. Cf. MānGr. I 22 21

12 Sh ०मुपास्ते

13 Sh adds श्रैष्ठ्य Cf Vas अध्वनामध्वपत इति सवितार प्रणम्य

14 After this verse Sh adds तच्चक्षुर्देवहित पुरस्ताच्छुक्रमुच्चरत् । पश्येम शरद शतं जीवेम शरद शत शृणुयाम शरदः शतं । प्रब्रवाम शरद शत अदीना स्याम शरदः शतं । भूयश्च शरद शतात्.

15 Sh दैवी या मानुषी मेधा.

16. Sh E ०मिहै(E हे)व

17 E. omits इति

18 Cf. MānGr I 22 11.

19 MS. II 7 3.

20 MS. I. 3 39.

द्वितीयाम् ॥[1] ३१ ॥ अपो[2] अद्यान्वचारिषम्[3] ... तं[6] मा संसृज वर्चसेति[4] मुखं परिमृजीत ॥[5] ३३ ॥

यदग्ने तपसा तपो ब्रह्मचर्यमुपेमसि ।
प्रियाः श्रुतस्य भूयास्मायुष्मन्तः सुमेधसः[8]
अग्ने समिधमहारिषं बृहते जातवेदसे ।
स मे श्रद्धां च मेधां च जातवेदाः प्रयच्छतु ॥ स्वाहा ॥

इति समिधमादधाति ॥ ३४ ॥ तेजसा मा समङ्ग्धि वर्चसा मा समङ्ग्धि ब्रह्मवर्चसेन मा समङ्ग्धीति मुखं परिमृजीत ॥ ३५ ॥ आयुर्दा अग्ने ऽसीति[10] यथारूपं गात्राणि संमृशति ॥[11] ३६ ॥ इह धृतिरिति[12] पर्यायैरंसं ग्रीवाश्चाचिरालभ्य[13] रुचं नो धेहीति[14] ललाटमभिमृशेत् ॥[15] ३७ ॥ आद्यन्तयोः पर्युक्षणम् ॥ ३८ ॥ गुरवे ब्रह्मणे च वरमुत्तरासङ्गं च ददाति ॥ ३९ ॥ द्वादशरात्रमक्षारलवणमाशेत् ॥ ४० ॥ अक्षारमेके ॥ ४१ ॥ व्युष्टे[16] द्वादशरात्रे षड्रात्रे वा[17] ग्रामात्प्राचीं वोदीचीं वा दिशमुपनिष्क्रम्य पश्चात्पैला[18]शस्य यज्ञीयस्य[19] वा वृक्षस्य[20] सावित्रेण स्थालीपाकेनेष्ट्वा जयप्रभृतिभिश्चाज्यस्य पुरस्तात्स्विष्टकृतो मेखलां दण्डं चाप्सु प्रास्येत् ॥ ४२ ॥ तत्रैव हवि-

1. Cf MānGr I 1 16
2 Sh E G. Vas आ०
3 F ०न्वा०
4 MS I 3 39
5 Identical with MānGr I 1 17
6 Sh omits तं.
7 Cf MānGr I 1. 18
8 Sh G भूयासमायु०, E F भूया आयु०.
9 MS I 5 2.
10 Sh E. G. add च.
11 Identical with VārŚr ms p 52
12 MS III 12 4.
13 Sh. पर्यायै अंसग्रीवाश्च त्रिरा०. Cf. VārŚr, ms, p 52 ध्रुवा असीति पृथिवीमभिमृश्याचिरालभ्य चक्षुषी आलभेत.
14 MS III 4 8.
15 Cf. MānGr I 1 22, 23
16 With this sūtra Vas begins a new section अथ सावित्रीव्रतोद्दीक्षणं, and explains it as सावित्रीव्रतोत्सर्गे तस्योद्दीक्षणमपर नाम.
17 Here E. G conclude the khanda. इति वाराहगृह्ये पंचम खण्डम्. In F the text runs continuously after वा, though on the margin it also has इति वाराहगृह्ये पंचम खण्ड. (contrary to the usual neuter खण्डम्).
18. Sh. E. G. पा०.
19 Sh. G. ०क्षि०.
20. Some mss. ०क्ष्य०.

श्शेषं भुञ्जीतेति श्रुतिः[1] ॥ ४३ ॥

इति वाराहगृह्ये पञ्चमं खण्डम्[2] ॥

[अथ व्रतानि]

उपनयनप्रभृति व्रतचारी स्यात् ॥[3] १ ॥ उपनयनेर्न[4] व्रतादेशा व्याख्याताः ॥ २ ॥ मार्गवासाः, सꣳहतकेशः, भैक्षाचर्य[5]वृत्तिः, सशल्कदण्डः, सप्तमौञ्जीं मेखलां धारयेद्, आचार्यस्याप्रतिकूलः, सर्वकारी ॥[6] ३ ॥ यदेनमुपेयात्तदस्मै दद्यात् । बहूनाꣳ येन सꣳयुक्तः ॥[7] ४ ॥ नास्य शय्यामाविशेत् ॥[8] ५ ॥ न रथमारोहेत् ॥[9] ६ ॥ न सꣳवसेत्[10] ॥[11] ७ ॥ न विहारार्थो जल्पेत् ॥[12] ८ ॥ न रुच्यर्थः[13] कश्चनं[14] धारयेत् ॥[15] ९ ॥ सर्वाणि साꣳस्पर्शकानि[16] स्त्रीभ्यो वर्जयेत् ॥[17] १० ॥ न स्नायाद्दण्डवत् ॥[18] ११ ॥ नोदकमभ्युपेयात् ॥[19] १२ ॥ न दिवा स्वपेत् ॥ १३ ॥ त्रैविद्यकं ब्रह्मचर्यं चरेत् ॥ १४ ॥

1. The VārŚr Par Gṛhyapurusha kh. 1 p 185 and MānGr II 3 14 have respectively the variants कर्तैव हविरशेषं॰ and ब्राह्मण एव हविरशेषं॰.
2. F. गृह्ये॰, Sh ॰पञ्चम खण्डः, E ॰षष्ठमं खण्डं संपू॰.
3 Identical with MānGṛ I. 1 1
4 Sh. E. G. ॰नयने.
5. F. ॰चा॰.
6. Cf MānGṛ. I. 1 2
7. Identical with MānGṛ I. 1 3
8. Identical with MānGr. I. 1. 4
9. Identical with MānGr. I. 1. 6.
10 Sh. संविशेत्, Gdh सवञ्जयेत् So also MānGr I 1 5
11 Cf MānGr (ib)
12 Identical with MānGr I 1 9
13 Sh ॰र्थं. So also MānGr I 1 10.
14. Thus E G. Other mss कंचन. Cf MānGr (ib) किंचन
15 Cf MānGr (ib)
16 E. ॰स्पर्शिका॰, F ॰स्प्रशुंका॰.
17 Identical with MānGr I 1 11
18 Cf. MānGr I. 1 13, 14, KāthGr I 21-23. Cf. Gdh न स्नायात् । दण्डवदुदकमभ्युपेयात्

इन्द्रियसंयतः सायं प्रातर्भैक्ष्यवृत्तिः[1] ॥ १५ ॥ सायं प्रातरग्निं परिचरेत् ॥ १६ ॥ अधश्शायी[2], आचार्याधीनवृत्तिः[3], तन्निसर्गादशनम्[4], अयाचितं लवणम्[5] ॥ १७ ॥ वाग्यतोऽश्नीयात् ॥ १८ ॥ मधुमांसे वर्जयेत् ॥[6] १९ ॥ अच्छिन्नवस्त्रां[7] विवृतां स्त्रियं[8] न पश्येत् ॥[9] २० ॥ यौप्यस्य[10] वृक्षस्य[11] दण्डी स्यात् ॥ २१ ॥ नानेन प्रहरेद्द्वे न ब्राह्मणाय ॥ २२ ॥ न नृत्यगीते गच्छेत् ॥ २३ ॥ न चैने कुर्यात् ॥ २४ ॥ नावलिखेत् ॥ २५ ॥ शिखाजटः सर्वजटो वा स्यात् ॥[12] २६ ॥ शाणीक्षौमाजिनवासाः[13] ॥ २७ ॥ रक्तं वसनकम्बलम्[14]—ऐणेयं ब्राह्मणस्य, रौरवं क्षत्रियस्य, आजं वैश्यस्य ॥ २८ ॥ एतेन धर्मेण द्वादशवर्षाण्येकवेदे ब्रह्मचर्यं चरेत् । चतुर्विंशति[15] द्वयोः, षट्त्रिंशति[16] त्रयाणाम्, अष्टाचत्वारिंशति[16] सर्वेषाम् । यावद् ग्रहणं वा ॥[17] २९ ॥ मलज्जुरबलः कृशः[18] स्नात्वा स सर्वं लभते[19] यत्किञ्चिन्मनसेप्सितमिति[20] ॥[13] ३० ॥ एतेन धर्मेण साध्वधीते ॥[21] ३१ ॥ मन्त्रब्राह्मणान्यधीत्य कल्पं मीमांसां च याज्ञिकोऽधीत्य वक्त्रं पदं स्मृतिं चै-

1. Sh ०भैक्षाचर्य०, E G. ०भैक्षाचार्य०.
2 Sh E G ०शय्या
3. E G. add तादाचार्यस्याधी (G धि)न.
4. Cf. MānGr I. 22 21 आचार्याय भैक्षमुपकल्पयते । तेनानुज्ञातो भुञ्जीतेति श्रुतिः
5. Sh. अयाचितमलवणम्. But compare Gdh लवणं न याच्यम्.
6 Cf MānGr. I 1. 12
7. Sh आच्छिन्न०, E G Gdh अक्लि०.
8 E. स्त्रीं.
9 Cf. MānGr. I 1. 8.
10 Sh. यौप०
11. F. ०क्ष्य०.
12 Cf. MānGr. I 2 6.
13 Sh. शाणं क्षौममजिनं वासः
14. Sh रक्तं वसनं । कम्बलं.
15 F. ०तिं
16 Sh त्रिंशत् and अष्टचत्वारिंशत्.
17 Cf MānGr I 2 6.
18 Sh सरज्जुरलकृतकृश', E. सरजुनलंकृकृश, F मलं सुरबल कृश, G. मरजुनलंकृत. कृश, Gdh मलजुर्मलदिग्धजानु. . .अबलः कृश The reading as emended above is from the Mān. (I. 2. 6) and the KāthGr (II. 4) The reading of F stands by itself and might be construed thus सः [शरीरेण] कृश [अपि ब्रह्मवर्चसा] सुरबल. मलं स्नात्वा सर्वं लभते०.
19 Sh लभेत.
20. E. omits इति.
21 Identical with MānGr. I. 2. 7.

च्छिकः (?) ॥ ३२ ॥ तौ स्नातकौ ॥ ३३ ॥ श्रोत्रियो ऽन्यो वेदपाठी । न तस्य स्नानम् ॥[2] ३४ ॥ उपविश्याचमनं विधीयते । अन्तर्जानु बाहू[3] कृत्वा त्रिराचामेत् ॥ ३५ ॥ द्विः परिमृजेत् । खानि चोपस्पृशेच्छीर्षण्यानि ॥ ३६ ॥

इति वाराहगृह्ये षष्ठं खण्डम्[5] ॥

[अथ वेदव्रतानि]

अथ चातुर्होतृकी दीक्षा सम्वत्सरम् ॥[6] १ ॥ आघारावाघार्याज्यभागौ हुत्वा चतुर्होतृन्स्वकर्मणो[7] जुहुयात् । सह पञ्चहोत्रा षड्ढोत्रा च[8] सप्तहोतारमन्ततः ॥[9] २ ॥ हुत्वा व्रतं प्रदायादितो द्वावनुवाकावनुवाचयेत् ॥[10] ३ ॥ अथाग्निव्रताश्वमेधिकी दीक्षा सम्वत्सरं द्वादशरात्रं वा ॥[11] ४ ॥ आकूतमग्निमिति[12] षड्ढुत्वा व्रतं प्रदायादितो ऽष्टावनुवाकाननुवाचयेत् ॥[13] ५ ॥ त्रिषवणमुदकमाहरेत्त्रींस्त्रीन्कुम्भान् ॥[14] ६ ॥ त्रींश्च समित्पूलान् ॥ ७ ॥ भस्मनि शयीत करीषे सिकतासु भूमौ वा ॥[16] ८ ॥ नोदकमभ्युपेयात् ॥[17] ९ ॥ सं-

1 Thus Sh Other mss. चौच्छिक.

2. Cf MānGṛ I. 2. 10.

3. E G ॰हुं

4. F ॰चं॰.

5. F. G. गृह्ये॰, Sh. ॰षष्ठ खण्ड, E ॰सप्तमं खण्डं.

6. Cf. MānGṛ. I. 23. 1.

7 Sh. ॰कर्मणे.

8. Sh. E. G. omit च.

9. Cf. MānGṛ I. 23. 2. In MānGṛ. अन्तत is to be joined with सप्तहोतारम्

10 Cf MānGr I 23 3

11. Cf MānGr I 23 5, 14

12 MS. II 7 7

13 Cf. MānGr I 23 6, 7

14. Identical with MānGr I 23 8

15. Sh ॰त्फ॰. The त्पु of the mss has been wrongly read as त्फ

16. Cf. MānGr I 23, 9.

17. Cf. MānGr. I 23. 10.

वत्सरे समाप्ते घृतवतापूपेनाग्निमिष्ट्वा वात्सप्रं वाचयेत् ॥[1] १० ॥ स्मार्तेन यावदध्ययनं काण्डव्रतविशेषां[2] होमार्थ(?)श्चाद्यन्तयोर्जुहुयात्[3] ॥ ११ ॥ अथैनं परिददीत[4]—अग्नये त्वा परिददानि[5] । वायवे त्वा परिददानि[5] । सूर्याय त्वा परिददानि[5] । प्रजापतये त्वा परिददानीति[5] ॥ १२ ॥ एतेनैवाश्वमेधो व्याख्यातः ॥ १३ ॥ नवमेनानुवाकेन हुत्वा दशमेनोपतिष्ठेत ॥[6] १४ ॥ अश्वाय घासमुदकस्थानमुदकं चाभ्युपेयात् ॥[7] १५ ॥ एताभ्यामेव मन्त्राभ्यां त्रैविद्यकं व्रतमुपेयात् ॥ १६ ॥ रहस्यमध्येष्यतां प्रवर्ग्यः ॥[8] १७ ॥ तस्य रहस्ये[10] व्रतोपायनं समिन्मन्त्रश्च ॥ १८ ॥ तिष्ठेदहनि रात्रावासीत वाग्यतः ॥ १९ ॥ पर्वसु चैवं स्यात् ॥ २० ॥ सर्वजटश्च स्यात् ॥ २१ ॥ संवत्सरावरः[11] प्रवर्ग्यो भवति ॥ २२ ॥

इति वाराहगृह्ये सप्तमं खण्डम्[12] ॥

---

1 Cf MānGr I 23 11

2. E G. ०विशेष–, Sh ०विशेषो

3 F ०र्थौश्चा०, G ०र्थोश्चा०
Gdh आदिवचनादुत्सर्गमपि कुर्यात्

4 Sh परिदत्ते.

5 Sh E. G ०ाम G omits प्रजापतये त्वा परिददामि

6 Cf MānGr I 23 15

7 Cf MānGr I 23 16

8 Sh E ०त .

9 Cf MānGr I 23 21
Cf VārŚr Par. Rahasya pp 270, 271 अथ प्रवर्ग्यादेशनम् । मंत्रब्राह्मणसमाप्तौ यथोक्तमपराह्णे कुमारं पर्युप्तिनं स्नातं मेखलावासोदण्डप्रदानादीनि यथोक्तमहतेनास्य वाससा शिर परिणह्येत् । तस्य नित्यानि व्रतानि प्रवर्ग्ये ऽधिकानि । तिष्ठेदहनि रात्रावासीत वाग्यत । सन्ध्याकाले वाक्संयमनवाशी दिवाशी । नित्यं पर्वसु वा त्रि स्नायात् । . एवं वत्सरमयुग्माणि वा वर्षाणि द्वादशवराण्यहतेनास्य वाससा शिर परिणह्येत् । गुरवे निवेद्य वरं दद्याद्यथाऽस्य रहस्यं प्रब्रूयात् । उत्तमो मार्जनो रहस्य कर्म भवति रहस्य भवति.

10 Sh omits रहस्ये

11 Sh E G ०सराद्वर , Gdh. सवत्सरादर्वाक्

12 F गृह्ये०, G ०वाराहसूत्रे०, Sh. ०अष्टमः खण्ड०, E ०नवम खण्डम्.

[अथोपाकरणम्]

वर्षासु श्रवणेनाध्यायानुपाकरोति[1] । हस्तेन वा । प्रौष्ठपदीमित्येके[2] ॥[3]१॥ अथ जुहोति—

अप्वा[4] नामासि तस्यास्ते जोष्ट्रीं गमेयम् ।

अहमिद्धि पितुः परि मेधा अमृतस्य जग्रभ[5] । अहꣳ सूर्य इवाजनि ॥ स्वाहा ॥

अप्वो नामासि तस्य ते जोष्ट्रं गमेयम् ।

अहमिद्धि पितुः परि मेधा अमृतस्य जग्रभ । अहꣳ सूर्य इवाजनि ॥ स्वाहा ॥[6]

इति[7] ॥[8]२ ॥ युक्तिर्नामासि । योगो नामासि । मतिर्नामासि[9] । सुमतिर्नामासि । सरस्वती नामासि । सरस्वान्नामासि[10] ॥ तस्यास्ते०, तस्य ते० इत्यनुषजेत्[11] ॥[12]३ ॥ युजे स्वाहा । प्रयुजे स्वाहा । सꣳयुजे स्वाहा[13] । उद्युजे स्वाहा । उद्युज्यमानाय[14] स्वाहेति जयप्रभृतिमिश्राज्यस्य पुरस्तात्स्विष्टकृतो ऽन्तेवासिनाꣳ योगमिच्छन्नथ जपति—ऋतꣳ वदिष्यामि सत्यꣳ वदिष्यामि ब्रह्म वदिष्यामि[15] तन्मामवतु तद्वक्तारमवत्ववतु मामवतु[16] वक्तारम् ॥ वाङ् मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविरायुर्मयि धेहि ॥ वेदस्य वाणी स्थ ॥ उपतिष्ठन्तु छन्दाꣳस्युपाकुर्महे ऽध्यायान् ॥[17] ४ ॥ ओं[18] भूर्भुवः स्वरिति दर्भपाणिस्त्रिः सावित्रीमधीत्यादितस्त्रीननुवाकाꣳस्तथाङ्गानामेकैकम् । को वो युनक्तीति च[19] ॥[20]५ ॥

1 Sh श्रवणेन स्वाध्या०.

2. F. प्रोष्ट०.

3 Cf MānGr. I. 4. 1

4. Sh. अघा—(misread for अप्वा)

5. Thus Sh. Other mss. जग्रमत् (F. has जग्रमत् in the next verse also) Cf MānGr. I. 4. 2, KāthGr. IX. 2

6. Sh. E. G. Gdh. omit अप्वो नामासि ...स्वाहा.

7. Sh. omits इति.

8. Cf. MānGr. (ib.).

9. Gdh. omits this and the three subsequent formulas.

10. Sh. omits सुमति सरस्वान्नामासि

11. Sh. तस्यास्ते जोष्ट्रीं गमेयं तस्य ते जोष्ट्रं गमेयं । इति सर्वत्रानुषजति.

12 Cf MānGr (ib).

13. Gdh omits प्रयुजे स्वाहा, संयुजे स्वाहा.

14 E G. युज्यमा०.

15. Gdh. and MānGr I. 4 4 omit ब्रह्म वदिष्यामि

16 F. omits तद्वक्तारमवत्ववतु माम्.

17. Cf. MānGr. I 4. 3-5

18. Sh. E. G. omit ओं.

19. Sh omits च.

20. Cf. MānGr. I. 4. 4, 5

[अथानध्यायाः]

तस्यानध्यायाः । समूहन्वातः[1], वल्मीकच्चारप्रभृति वर्षे[2], न विद्योतमाने न स्तनयतीति[3] श्रुतिः, आकालिकं देवतुमूंल[4] विद्युद्ध्वन्वोल्काऽत्यच्चराः शब्दाः, आचारेणान्ये[5] ॥[6] ६ ॥

[अथोत्सर्जनम्]

अर्धपञ्चमान्मासानधीत्य पञ्चार्धषष्ठान्वा दक्षिणायनं[7] वाऽधीत्याथोत्सृजन्त्येतेन धर्मेण—ऋतमवादिषं[8] सत्यमवादिषं ब्रह्मावादिषं तन्मामावीत्तद्वक्तारमावीदावीन्मामावीद्वक्तारम् ॥ वाङ् मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमाविरायुर्मयि धेहि ॥ वेदस्य वाणी स्थ ॥ प्रतिश्वसन्तु छन्दांस्युत्सृजामहे[9] ऽध्यायान् ॥[10] ७ ॥ ओं[11] भूर्भुवः स्वरित्यन्तमधीत्य को वो विमुञ्चतीति च ॥[12] ८ ॥

[अथानध्यायाः]

पक्षिणीं[13] रात्रीं नाधीयीत[14] । उभयतःपक्षां वा ॥[15] ९ ॥ नात ऊर्ध्वमभ्रेषु ॥[16] १० ॥ आकालिकौ विद्युत्स्तनयित्नुवर्षं[17] वर्षे च ॥[18] ११ ॥

1. Sh. E G. Gdh. ०हनवा०.
2. Sh वल्मीकच्चारप्रभृतिवर्षान्, E G ०वर्षन्.
3. For न विद्योत०...स्तनयतीति Sh reads विद्योतमानस्तनयित्नुरिति, while E. G. have विद्योतमानस्तनयितोविति For स्तनयतीति F has स्तनयत इति.
4. Sh E. ०मु० Cf MānGr. I 4 6 and its commentary
5. Sh. E. G. omit अन्ये.
6. Identical with MānGr. I. 4. 6.
7. Thus Sh. Other mss. ०ना०.
8. Sh adds तद्
9. E G ०स्युत्सृजे
10. Cf MānGr I 4 7-9
11. Sh E. G omit ओं.
12. Cf. MānGr I 4 8, 9
13. Sh. ०त्रिं.
14. F. ०धीत
15. Cf. MānGr I. 4 10.
16. Thus Sh. Other mss आकालिकौ.
17. Sh. E. G omit वर्षं.
18. Cf. MānGr. I. 4. 11.

[अथोपनिषदर्हाः]

अथोपनिषदर्हाः । ब्रह्मचारी सुचरिती[1] मेधावी कर्मकृद्धनदः प्रियः, विद्यया वा विद्यामन्विच्छन् ॥[2] १२ ॥ तानि तीर्थानि ब्रह्मणः[3] ॥[4] १३ ॥

इति वाराहगृह्ये ऽष्टमं खण्डम्[6] ॥

[अथ गोदानम्]

षोडशवर्षस्य गोदानम्[7] । अग्नि॰ वाऽध्येष्यमाणस्य[8] । अग्निगोदानो[9]

1 Sh ॰चरित–

2 Cf. MānGr I 7 1

3 F ब्रा॰.

4 Sh. E G add वेदस्य ब्रह्मचारित्वादय ग्रहणे तीर्थान्युपाया (E G add further ब्राह्मण) In F this passage has been noted on the margin, though slightly changed ब्रह्मणा वेदस्य ब्रह्मचारित्वादय· ग्रहणे तीर्थान्युपाया The VārŚr Par Antarkyakalpa ms p. 364 reads this and the former sūtra thus अथोपनिषदर्हा । ब्रह्मचारी सुचरिति मेधावा कर्मकृद्धनद प्रिय विद्यया वा विद्यामन्विच्छ·स्तानि तीर्थानि ब्राह्मण· Cf. KāthGr X 2

5. Identical with MānGr. I 7. 2.

6. F. गृह्ये॰, Sh ॰सप्तमः खण्ड , G वाराहसूत्रे सप्तमं खण्ड समाप्तम्.

7 Gdh. explains the word thus दक्षिणोत्तरपश्चिमजटा गोदानशब्दवाच्य । गवि भूमौ दीयत इति गोदानम् । तच्च केशान्ताख्य कर्म Ādityadarsana commenting on KāthGr XLIV 1 proceeds a step further गवि भूमौ दीयत इति गोदान स्वपत शिरोभागम्

8 The interpretation of this passage as given in MānGr commentary I 21 13 is as follows अग्निं युञ्जानकस्यान यदाध्येष्यमाणस्यागच्छेत् तदा वा Cf KāthGr XLIV 1 अग्नौ वा समाप्ते and on it the gloss of Ādityadarśana बह्विष्टके हिरण्यगर्भान्ते पठित इत्यर्थ On बह्विष्टक Prof. Caland gives the note बह्विष्टक is apparently a designation of the Agnicayana part of the Yajurveda (Kāth. XIX 1 sqq) According to Ād this part ends with Kāth XXII 14 70 19

9. Sh. ॰गोदानिको Cf MānGr ib अग्निगोदानिको (though the com. and even some of the Gr mss. read अग्निगोदानिको).

मैत्रायणिः[1] ॥[2] १ ॥ जटाकरणेनोक्तो[3] मन्त्रविधिः ॥[2] २ ॥ उपस्थे उपकक्ष-योश्चाधिको मन्त्रप्रयोगः ।

यत्क्षुरेण पर्चयता[5] सुपेशसा वप्त्वपसि केशश्मश्रूर्[6] ।
शुन्ध शिरो मुखं मास्यायुः प्रमोषीः ॥

इति ॥ ३ ॥ भूमौ केशान्निखनेत् ॥ ४ ॥ अन्ते गां दद्यात् ॥ ५ ॥

[अथ समावर्तनम्]

वेदे गुरुणाऽनुज्ञातः स्नायात् ॥ ६ ॥ छन्दस्यर्थान्बुद्ध्वा स्नास्यन्गां कारयेत्[7] ॥[8] ७ ॥ आचार्यमर्हयेत् ॥[10] ८ ॥ आपो हि ष्ठेति[11] तिसृभिः, हिरण्य-वर्णाः शुचय[12] इति चतसृभिः स्नात्वाऽहते वाससी परिदधीत[13]—वस्त्रंसि[14] वसु-

1 Sh. reads मैत्रायणीय–
Gdh अग्नि प्रधानदेवता गोदाने अस्य ब्रह्मचारिण स अग्निगोदान मैत्रायणिरा चार्यो मन्यते यस्मात् तस्मादाग्नेयश्चरु Cf also MānGr com I 21 13 अग्निप्रवर्तनात्प्रागूर्ध्वमेव वेलानियम । अत्र प्रमाणमाह—अग्निगोदानिको मैत्रायणिरिति श्रुति । गोदाने भावो गोदानिक गोदान-प्रयोजनो वा

2 Cf MānGr ib.

3 Sh ०नोक्त–.

4 The VaikhDh III 15 assigns to the son born of अम्बष्ट (born of विप्र and वैश्या III 12) father and क्षत्रिया mother the duty of shaving the body below the nave [अम्बष्ठात्] क्षत्रियायामधोनापित — नाभेरधो रोमवप्ता These अधोनापितs were different from those who shaved the body above the nave, and held a low position in society They still exist in the South

5 Sh gives only the pratīka यत्क्षुरेण मर्चयता.

6 G Gdh केशान्

7 G ०यु

8 MānGr com I 2 8 प्रवरा गा कार-येत् । मधुपर्काद् वा भूता गा 'कुरुत' इति [I 9 20] प्रेष्यन् 'कारयति' इत्युच्यते Cf KāthGr III 1 and thereon the Bhāshya of Devapāla, the Paddhati of Brāhmanabala and the Vivarana of Ādityadarsana

9 Identical with MānGr I 2 8

10 Cf MānGr I 2 9

11 MS II 7 5

12 MS II 13 1

13 Thus Gdh Sh ०ददाति, other mss ०ददीत

14 Sh and MānGr. I 2 12 वस्त्य०, but the Baroda edition of the MānGr agrees with the text given above

मन्तं मीं कुरु सौवर्चसाय वा[2] तेजसे ब्रह्मवर्चसाय[3] परिदधानीति[4] ॥[5]९॥ विश्व-जनस्य छायासीति[6] छत्रं धारयते ॥[7]१०॥ मालामाबध्नीते—

यामश्विनौ धारयेतां बृहती पुष्करस्रजम् ।
तां विश्वैर्देवैरनुमता मालामारोपयामि ॥

इति[8] ॥[9] ११ ॥ तेजो ऽसीति[10] हिरण्यं बिभृयात् ॥[11]१२॥ प्रतिष्ठे स्थो देवते[12] मा मा संताप्तमित्युपानहौ ॥[13]१३॥ विष्टम्भो ऽसीति[14] धारयेद्वै-णवीं यष्टिम्[15] ॥[16]१४॥ सोदकं च कमण्डलुम् ॥ १५ ॥

[अथ स्नातकधर्माः]

नित्यव्रतान्याहुराचार्याः ॥ १६ ॥ द्विवस्त्रो ऽत ऊर्ध्वम् । शोभनं वासो भर्तव्यमिति श्रुतिः ॥[18]१७॥ आमन्त्र्य गुरून्गुर्वधीनांश्च स्वान्गृहा-न्व्रजेत् ॥[20]१८॥ प्रतिषिद्धमपरया द्वारा निस्सरणं, मलवद्वाससा सह संभाषा रजस्वद्वाससा सह शय्या, गोर्गुरोर्दुरुक्तवचनम्[21], अस्थाने शयनं स्थानं स्मयनं यानं गानं स्मरणमिति । तानि वर्जयेत् ॥[22]१९॥ याजनं वृत्तिः ।

1 Sh Gdh Vas MānGr I 2 12 मा.
2. Sh MānGr ib. मा.
3 E. G Vas. add वा
4 Sh. E Vas MānGr ib ०दधामि or ०ददामि for ०दधानि, F G Gdh. ०ददानि
5 Cf MānGr. I 2. 11, 12.
6. MS I. 2 11.
7. Cf MānGr I. 2 15
8 Sh. विश्वेदेवै०.
9. F. ०रोपयामत[ह] इति, but Gdh Vas ०रोपयाम इति
10 MS. I. 1 11.
Sh. omits from the text तेजो ऽसीति and gives it in the footnote.
11 Cf MānGr. I. 2. 14.
12. Sh. MānGr. I. 2. 16 add द्यावा-पृथिवी.
13 Cf MānGr ib, KāthGr III 8
14 TS III 5 2 2, KS XVII 7.
15 Gdh Vas वैष्णवं दण्ड.
16 Cf MānGr I 2 15
17 Before सोदक Gdh and Vas insert ओं प्रजापते इति अक्ष्णोरंजने विनियोग (cf MānGr I 2 13), and further on supply the verse missing in the Grhya इमा आप प्रभरामि[ ]अमृतेन सहायुषा [cf. VārGr V 27] इत्यनेन सोदककमण्डलुधारणम् । तत कुलाचार.
18. Cf. MānGr I 2 17.
19 Sh गुरुवधूश्च
20 Cf MānGr. I. 2. 18.
21. A गुरोर्दु०, B. Gdh. गोगुरोर्दु०, emended by Sh to गोगुर्वोर्दु०.
22. Cf. MānGr. I. 2. 19.

उञ्छं[1] शिलमयाचितप्रतिग्रहः साधुभ्यो वा याचितम् । असंसिध्यमाना-[2] या[3] वा वैश्यवृत्तिः ॥ २० ॥ स्वाध्यायविरोधिनो ऽर्थानुत्सृजेत् ॥ २१ ॥

इति वाराहगृह्ये नवमं खण्डम्[4] ॥

[अथ कन्यावरणम्]

विनीतक्रोधः सहर्षः[5] सहर्षीं[6] भार्यां[7] विन्देतानन्यपूर्वां[8] यवीयसीम् ॥१॥ असमानप्रवरैर्विवाहः । ऊर्ध्वं[9] सप्तमात्पितृबन्धुभ्यः पञ्चमान्मातृबन्धुभ्यो बीजिनश्च ॥ २ ॥ कृत्तिकास्वातिपूर्वैरिति वरयेत् ॥[8] ३ ॥ मृगशिरःश्रविष्ठोत्तराणीत्युपयमेत् ॥[9] ४ ॥ पञ्च विवाहकारकाणि भवन्ति—वित्तं[10] रूपं विद्या प्रज्ञा बान्धवमिति ॥[10] ५ ॥ एकालाभे वित्तं विसृजेत् । द्वितीयालाभे

1. Sh. उञ्छ-.
According to Kullūka (M Smṛti X 112) शिल=अनेकधान्योन्नयन 'gleaning more than one ear of corn at a time' opposed to उञ्छ=एकैकधान्यादिगुडकोच्चयन Gdh 's explanation is, however, different उञ्छवृत्त्या यायावरवृत्त्या वा जीवेत्
2 For अस Sh reads अनायासेन
3 Sh. ०र्थान् विसृ०
4. F. गृह्ये०, Sh. ०नवम खण्ड, E ०दशम खण्डम्, G ०अष्टमखण्डम् ॥८॥ समाप्तिमगमत् ॥ शुभं भूयात् ॥
5. Thus Sh Gdh , F ०क्रोधहर्ष
6. Sh has महिर्षीं. Gdh महिर्षीं=हर्षयुक्ता points to सहर्षीं as the original reading
7. Identical with MānGr I 7 4.
8 Gdh. ०यमे Thus also MānGr I. 7 5 and KāthGr XIV. 10. Gdh takes it to be a Vedic irregularity for उपयमेत्, but Devapāla on KāthGr ib explains it as the locative singular of उपयम — उपयम स्वीकार । तत्रैतान्यनुकूलानीत्यर्थ .
9. Cf. MānGr. ib.
10 Cf. MānGr I. 7 6

रूपम् । तृतीयालाभे विद्याम् । अज्ञायां तु बान्धवे च[1] विवदन्ते ॥[2] ६ ॥

अनृक्षरा ऋजवः सन्तु पन्था येभिः सखायो यन्तु[3] नो वरेयम् ।

समर्यमा सं भगो नो ऽनुनीयात्सं जास्पत्यꣳ सुयममस्तु देवाः ॥[4]

इति वरकान्व्रजतो ऽनुमन्त्रयते[5] ॥ ७ ॥ बन्धुमतीं[6] कन्यामस्पृष्टमैथुनामुपयच्छेतानग्निकाꣳ श्रेष्ठाम् ॥[7] ८ ॥ विज्ञानमस्यै कुर्यात् । चतुरो लोष्टानाहरेत्—सीतालोष्टꣳ वेदिलोष्टं गोमयलोष्टꣳ श्मशानलोष्टं च ॥[8] ९ ॥

1 For बान्धवे च Sh reads बान्धवा .

2 Cf MānGr I 7 7

3 Sh यन्ति.

4 Gdh takes each of the hemistichs as one verse

5 The ācārya (?) chants the mantra while the groom's party proceeds towards the bride's house to finally settle the match

6 Gdh बन्धुमतीं भ्रातृमतीमित्यर्थ .

7 Gdh अनग्निका पृष्ठा (?) अवाप्त (v l अप्राप्त)स्त्रीभावात् । यद्वा नग्ना विवस्त्रीरूपा अज्ञातलज्जा लावण्ययुक्ता विवहेदित्यर्थ Cf MānGr I. 7 8 नग्निका and the com नग्निकाम्=अप्राप्तस्त्रीभावाम् । अथवा नग्निका श्रेष्ठाम् । विवस्त्रा सती श्रेष्ठा या भवेत्तामुपयच्छेत । यस्मात्कुरूपाऽपि वस्त्राद्यलंकारकृता मनोहारिणी भवति तस्माद्विवस्त्रा सती न सर्वा शोभते.

But VaikhGr VI 12 अष्टवर्षादा दशमान्नग्निका.

It would be interesting to note in this connection the view of Sir Thomas More as recorded in his Utopia that before marriage a staid and honest matron "showeth the woman, be she maid or widow, naked to the wooer At this custom we laughed and disallowed it as foolish But they, on their part, do greatly wonder at the folly of all other nations which, in buying a colt be so chary and circumspect that though he be almost all bare, yet they will not buy him unless the saddle and all the harness be taken off, lest under these coverings he hid some gall or sore And yet, in choosing a wife, they be so reckless that all the residue of the woman's body being covered with clothes, they estimate her scarcely by one handsbreadth (for they can see no more but her face) and so join her to them" (Quoted by H Ellis, Studies in the Psychology of Sex Vol VI p 102)

8 Cf. MānGr. I 7 8

9. Cf. MānGr I. 7 9.

Cf. BhārGr. I 11 श्लोकं तु लाक्षणा उदाहरन्ति—

यस्यां मनो ऽनुरमते चक्षुश्च प्रतिपद्यते ।

ता विद्यात्पुण्यलक्ष्मीका किं ज्ञानेन करिष्यति ॥

Dr. Salomons' view that this "must be a later addition from a light-hearted copyist" is untenable, for

तेषामेकं गृह्णीष्वेति ब्रूयात् । श्मशानलोष्टं चेद् गृह्णीयान्नोपयच्छेत्[2] ॥[3] १० ॥ असंस्पृष्टां धर्मेणोपयच्छेत्[5] ब्राह्मेण[6] शौल्केन वा ॥[7] ११ ॥ शतमितिरथं दद्याद् गोमिथुनं वा ॥[9] १२ ॥ उभयांस्तेजनीष्वासजेज्जन्यान्कौमारिकांश्च । पूर्वे जन्याः स्युरपरे कौमारिकाः ॥ १३ ॥ चतुरो गोमयपिण्डान्कृत्वा द्वावन्येभ्यस्तथान्येभ्य इति प्रयच्छेत् ॥[11] १४ ॥ धनं न इति ब्रूयुः । पुत्रपशवो न इति[12] जन्याः ॥[13] १५ ॥ ददानि[14] । प्रतिगृह्णानीति[15] त्रिर्ब्रह्मदेयाम्[16]

similar passages are quoted in other ancient texts as well, e g ĀpGr I 3. 20 and Vātsyāyana's Kāmasūtra ch XVI यस्या मनश्चक्षुषोर्निबन्धस्तस्यामृद्धिर्नेतरदा (Vātsyāy. °रामा° for °रदा° of Āp) द्रियेतेत्येके.

1 Sh Gdh. एते°

2 Sh E Gdh. °त्

3 Cf. MānGr I. 7 10

4 Sh °सृ°. Cf. MānGr I 7 11 संजुष्टा.

5 Sh E. °त्.

6. Gdh. ब्राह्मो धर्म उदकपूर्वकदानम्.

7. Cf MānGr ib.

8 But F. शतमति°, and Gdh शुल्कनियममाह—शतमित्यादि । सपादं तु अथाधिकं शतं गवा दद्यात् Prof Caland suggests शमरथं 'a slow-going chariot' (Sāyana on TS Calcutta ed. p 1008). A more probable reading is शतमधिरथं. Cf Viśvarūpācārya on Yājñavalkya Smrti I. 80, where he cites an ancient Brāhmana passage तस्माद् दुहितृमते ऽधिरथं शतं देयमितीह क्यो विज्ञायते The word अधिरथ goes back to Ṛgveda, and means a cart-load. Sāyaṇa would have translated शतमधिरथं by 'a hundred bullocks and carts' Our variant शतमतिरथं stands very close to शतमधिरथ

9 Identical with MānGr I. 7 12

10 Sh. Gdh उभये Sh reads it along with गामिथुन वा, i e 'both the parties are to present a pair of cows' Here Sh forgets that शुल्क is to be given by one party alone Cf Gdh. कन्यायै वरो ददाति

11. Gdh तत आचार्यश्चतुरो गोमयगोलकान्कृत्वा द्वौ कन्यादातु प्रयच्छेद् द्वौ कन्याप्रतिगृहीतृहस्ते च.

12 Sh puts a stop after इति and reads जन्या (for our जन्या.) along with ददामि of the next sūtra.

13 Gdh. ओं धनं न इति, [ओं] पुत्रपशव[ो न इति च] गोमयगोलकदानग्रहणे विनियोग.. Of these the first mantra is to be chanted by the groom's party and the second by the bride's party.

14. Sh. E. Gdh °मि After ददामि Sh adds इति.

15 Sh. E. Gdh °मीति
Sh. E. add प्रतिगृह्य.

16. Sh. E. °देयानि.

॥[3] १६ ॥ कृतेनांऽसेनं[2] विसंकसेयुः ॥[3] १७ ॥ त्रिरानन्दं मागधो ह्वयेत् ॥ १८ ॥

इति वाराहगृह्ये दशमं खण्डम्[4] ॥

[अथ मधुपर्कः]

षडर्घ्यार्हा भवन्ति—ऋत्विगाचार्यो वि[5]वाह्यो राजा स्नातकः प्रियश्चेति ॥[6] १ ॥ अप्राकरणिकाना[7]ं परिसंवत्सरादर्हयन्ति । अन्यत्र याज्यात्कर्मणो विवाहाच्च ॥[8] २ ॥ न जीवपितृ[9]को ऽर्घ्यं प्रतिगृह्णीयात् ॥[10] ३ ॥ अथै[11]नमर्हयन्ति ॥[12] ४ ॥ कांस्ये चमसे वा दधनि[13] मध्वासिच्य वर्षीयसाऽपिधाय[14] विराजो दोहो ऽसि विराजो दोहो ऽसि[15] विराजो दोहमशीय मयि दोहः पद्यायै विराज[16] इति मधुपर्कमा[17]ह्रिय[18]माणं प्रतीक्षते[19] ॥[20] ५ ॥ सावित्रेण

1. Gdh. ददामीति कन्यादातृ वदेत् । कन्याप्रतिगृहीता प्रतिगृह्णामीत्युक्त्वा प्रतिगृह्णीयु । इत्येवं त्रिः । चतुर्थं तूष्णीम् । यत ब्राह्मविवाहे नान्यत्र.
2. For अंसेन Sh. has असं न.
3. Gdh. अथ कृतेन स्कन्धेनोपलक्षिता प्रत्यानजेयुर्वरकाः.
4. F. गृह्ये०, Sh. ०दशमः खण्ड०, E. ०एकादशमं खण्डम्
5. Gdh. वै०.
6. Identical with MānGr I, 9, 1.
7. Sh. ०ना. Gdh प्राकरणिका ऋत्विगादयः पञ्च.
8. Cf. MānGr. I. 9. 2, 3.
9. Sh. E. ०वत्पि०.
10. Cf. MānGr. I. 9. 4 : न जीवत्पितृको ऽर्घ्यं प्रतिगृह्णीयादिति श्रुतिः
11. E. तथै०.
12. Sh omits the sūtra. Identical with MānGr I 9 5. Gdh. कन्यापिता वरशाखानुसारेण मधुपर्केणैनमर्हयेत्.
13. Sh. सदधि.
14. Sh. adds आचमनीयप्रथमैः प्रतिपद्यन्ते.
15. Sh omits the second विराजो दोहोऽसि.
16. Sh. adds कल्पताम्, while B omits even विराजः
17. Sh. एकैकमा०.
18. F. ०ह्री०.
19. Gdh. कन्यापित्राह्रियमाणं मधुपर्कं वरो ऽवेक्ष्यति.
20. Cf. MānGr. I, 9, 6, 7.

विष्टरौ[1] प्रतिगृह्य राष्ट्रभृदसीत्यासन्धामुदगग्रमास्तृणाति[2] ॥[3]६॥

अहं वर्ष्म सदृशानामुद्यतानामिव[4] सूर्यः ।

इदमहं तमधरं करोमि[5] यो मा कश्चाभिदासति[6] ॥

इत्येकस्मिन्नुपविशति[7] ॥[8]७॥ [9]मा त्वद्योषम्[10]मित्यन्यतरमधस्तात्पाद-योरुप[11]कर्षति[12] ॥[13]८॥ विष्टर आसीनायैकैकं[14] त्रिः प्राह ॥[15]९॥ नैव भो इत्याह । न मा रिषामेति[16] ॥[17]१०॥ आचमनीयाः प्रथमाः प्रतिपद्यन्ते ॥[18]११॥ अमृतोपस्तरणमसीत्याचामति ॥[19] १२॥ पद्येन पादौ प्रक्षालयति ॥[20]१३॥ स्पृशत्यर्घम् ॥[21]१४॥ ततः प्रणयति ॥[22]१५॥ सावित्रेणोभयतो-

1 Sh विष्टरं

2 Sh omits राष्ट्रभृदसि °मास्तृणाति. Gdh राष्ट्रभृदसि इत्यस्य विष्टरो देवता । आस्तरणे विनियोग.

3 Cf MānGr I 9 7, 8

4. Sh °मुद्यतामिव

5 A इद तमभितिष्ठामि

6 Sh. कस्यचिदासति, Gdh कस्याश्चाभि°.

7. A. यो मा कश्चा अभिदासति इति जपति. Gdh. अहं वर्ष्मेत्यस्य. उपविशने विनियोग.

8 Cf. MānGr I. 9 8.

9 Before this verse Sh inserts राष्ट्रभृदसीत्याचार्य आसन्दीमनुमंत्रयते.

10. Thus corrected. The mss त्वा जो(A दो)षम्.

11 Sh पादयोर्विष्टरमुप°.

12 Gdh तत्र पादौ स्थापयेत्

13 Cf. MānGr I 9 10.

14. Sh. विष्टरमासीनायैकं.

15 Identical with MānGr. I. 9. 11

16. For न मा रिषामेति Sh reads न । म आर्षेयाय इति श्रुति॰, and puts down in the footnote न परिषामेत्याचमनीया प्रथमा प्रतिपद्यन्ते अमृतोपस्तरणमसीत्याचामति.

17. Cf MānGr I 9 12 Gdh नैव भो इति शब्दे पाणिना स्पृष्ट स्पृशति । पश्चाद् गृह्णीयादित्यर्थ (cf MānGr. com विष्टरासीनायेति वचनान्नैव भो इत्याह । नम आर्षेयाय इति च । नैवभोशब्देन च पाणिना संस्पृशति । पश्चाद् गृह्णात्येव) न मारिषा इमेर्षेयाय (?) सुसुश्रुतुषे (?) ददाति । छदासि तया प्रीणाति इति श्रुति Cf also KāthGr XXIV. 9 नैव भो इत्याह न मार्षेति and Devapāla's com thereon अभ्यर्हणीयाभिमुख्यापादनाय यद् भो इति पूजासंबोधन प्राप्तं नामसबोधनं च मार्ष यज्ञदत्त इत्यादि तन्निषेधयति.

18 Cf. MānGr I 9. 6.

19. Cf MānGr. I 9 15
Sh omits sūtras 11 and 12

20 Cf MānGr. I. 9. 13.

21 Cf. MānGr. I. 9. 12

22. Sh puts sūtras 13-15 (पाद्येन पादौ. . स्पृशत्यर्घ्यं...प्रणयति) in the footnote, and substitutes for them the Mā-

विष्टरं मधुपर्कं प्रतिगृह्य—अदित्यास्त्वा पृष्ठे सादयामीति[1] भूमौ[2] प्रतिष्ठाप्यावसाय्यं[3] सुपर्णस्य त्वा गरुत्मतश्चक्षुषाऽवेक्ष इत्यवेक्ष्य नमो रुद्राय पात्रसदे[4] इति प्रादेशेन प्रतिदिशꣳ व्युद्दिश्याङ्गुष्ठेनोपमध्यमया च मधु वाता ऋतायते[5] इति तिसृभिः सꣳसृजति ॥[6]१६॥ सत्यꣳ[7] यशः श्रीर्मयि श्रीः[8] श्रयतामिति[9] त्रिः प्राश्नाति भूयिष्ठम् ॥[10]१७॥ सुहृदे ऽवशिष्टं प्रयच्छति ॥[11]१८॥ अमृतापिधानमसीत्याचामति ॥[12]१९॥ असिविष्टरपाणिर्[13]गां प्राह ॥[14]२०॥

हतो मे पाप्मा पाप्मानं मे हत ॥[15]

यां त्वा देवा वसवो ऽन्वजीविषुरादित्यानाꣳ स्वसारꣳ रुद्रमातरम् ।
दैवीं[16] गामदितिं जनानामारभन्तामर्हतामर्हणाय ॥[17]

ओं कुरुतेति संप्रेष्यति ॥[18]२१॥ चतुरवरान्ब्राह्मणान्नानागोत्रानित्येकैकं पश्वङ्गं पायसꣳ वा भोजयेत् ॥[19]२२॥ यद्युत्सृजेत्—

माता रुद्राणां दुहिता वसूनाꣳ स्वसादित्यानाममृतस्य नाभिः ।
प्र नु वोचं[20] चिकितुषे जनाय मा गामनागामदितिं वधिष्ट ॥
ओमुत्सृजत[21] तृणान्यत्तूदकं पिबतु ॥[22]

nava sūtras स्पृशत्यर्घ्यं पाद्येन पादौ प्रक्षाल्य (I 9. 12, 13)

1 MS I. 1 2

2 Sh omits भूमौ.

3. Sh. E. ०वसाय. Gdh प्रतिष्ठाप्योद्घाटयेत्

4 E. पात्रसादने.

5. MS. II. 7. 16.

6. Cf. MānGr. I. 9 13, 14.

7 Before this verse Sh inserts अमृतोपस्तरणमसि इत्युपस्तरति.

8. F. omits श्री.

9 Sh adds मधुपर्कं.

10. Gdh. चतुर्थं तूष्णीं. Cf. MānGr I. 9 16

11. Identical with MānGr. I. 9 18 Gdh. अवशिष्टं सुहृद्भ्यो ददाति । नावशेषणावश्यकं भूयिष्ठमिति वचनात्.

12. Identical with MānGr. I. 9. 17. Gdh reverses the order of sūtras 18, 19

13 Sh असिपाणि०

14 Gdh. खड्गदर्भमुष्टिहस्त कन्यापिता गौ इति ब्रूयात् । मुञ्च गामिति वरो ब्रूयात्. Cf MānGr I 9. 19

15 Gdh हतो मे - मे हत इति गा प्राह । गामुद्दिश्येति वामकरेण स्पृशेत्

16. E Gdh देवीं

17 Gdh वर आलभ्यमानाया गवि जपति—ओं या त्वा -

18 Cf MānGr I. 9 20.

19. Cf. MānGr I 9. 21, 22

20. E. प्र ण वोचि.

21. Sh. ॐ० भूर्भुवस्स्वरों—इत्युत्सृजतु Gdh ओमुत्सृजत । ओं भू भुव स्व उत्सृजेत्

22. Here Sh. and MānGr I. 9. 23

इत्युक्ते पशुमालभन्ते[1] ॥[2] २३ ॥ शं नो मित्र इति पाणी[3] प्रक्षाल्य यथार्थम् ॥[4] २४ ॥

इति वाराहगृह्ये एकादशं खण्डम् ॥

[अथालंकरणम्]

अथालंकरणम्[6]—अलंकरणमसि सर्वस्मा[7] अलं[8] भूयासम् ॥[9] १ ॥ प्राणापानौ मे तर्पयामि समानव्यानौ मे तर्पयाम्युदानरूपे मे तर्पयामि चक्षुःश्रोत्रे मे तर्पयामि[10] सुचक्षा[11] अहमक्षिभ्यां भूयास[12] सुवर्चा मुखेन सुश्रुत्कर्णाभ्यामिति गन्धाच्छादने[13] ॥[14] २ ॥

परिधास्ये यशो धास्ये दीर्घायुत्वाय जरदष्टिरस्मि[15] ।

conclude the Madhuparka section.

1 Sh. has at the end of the next chapter. यदि पशुमालभते—शं नो मित्र इति पाणी प्रक्षाल्य यथार्थमालभनमित्येके

2. Cf. MānGṛ. I. 9. 23.

3. E. ०णिं.

4. Gdh. नायं कलियुगधर्मः.

5. Sh. and MānGṛ do not end the chapter with Madhuparka, but go on with अथालंकरणम्.
E. पंचदश खं०, F. गृह्य०.

6. F. omits अथालंकरणम्. Gdh. ततः कन्यापिता वरस्यालंकरणं वस्त्रयुग्मं च दद्यात्.

7. Sh. Gdh. ०स्माद्.

8 Sh adds मे.

9 Cf. MānGṛ. I 9 24. Gdh. अलंकरणमसि...अलं भूयासमिति अलंकरणम्.

10 Sh. omits चक्षुःश्रोत्रे मे तर्पयामि.

11. Sh. ०चक्षुर्.

12. Sh. adds भूयासम्.

13. Sh. इति यथालिङ्गमङ्गानि संस्पृशति अथ गन्धाच्छादने वाससी. Gdh. प्राणापानौ मे ...इति नासारन्ध्रद्वयं स्पृशेत् । ओं चक्षुःश्रोत्रे...सुवर्चा मुखेन इति सर्वं मुखं स्पृशेत् । सुश्रुत्...इति कर्णौ स्पृशेत् । अथवा एतौ द्वौ मंत्रौ गन्धोद्वर्तने विनियोगयुक्तौ । तद्यथा—ओं प्राणापानौ मे...इति कराभ्यां कर्णसहितं मुखमवलिपेत् ।...

14. Cf. MānGṛ I. 9. 25, 26.

15. Sh. ०दष्टिरस्तु, other mss. ०रस्मि.

शतं च जीवं[1] शरदः पुरूचीर्वसूनि[2] चाय्यो विभजाय जीयाम् ॥

इत्यहतं[3] वासं[4] आच्छाद्याग्निं प्रज्वाल्य व्याहृतिभिर्व्रीहियवान्हुत्वा मङ्गलान्याशासेत्[5] ॥ ३ ॥

इति वाराहगृह्ये द्वादशं खण्डम्[6] ॥

[अथ प्रवदनकर्म]

अथ प्रवदने कन्यामुपवसितां स्नातां संशिरस्कामहतेर्नाच्छिन्नदशेन वाससा संवीतां संस्तीर्णस्य पुरस्ताद्विहितानि वादित्राणि विधिवदुपकल्प्य पुरस्तात्स्विष्टकृतो वाचे[9] पथ्यायै[10] पूष्णे पृथिव्या अग्नये सेनायै धेनायै गायत्र्यै त्रिष्टुभे जगत्या अनुष्टुभे पङ्क्तये[11] विराजे राकायै सिनीवाल्यै कुह्वै[12] त्वष्ट्र आशायै संपत्त्यै भूत्यै निर्ऋत्या अनुमत्यै पर्जन्यायाग्नये स्विष्टकृते च जुहुयात् ॥ १ ॥ आज्यशेषेण[13] पाणी[14] प्रलिप्य कन्याया मुखं[15]

1 Sh. शत जीवेम

2. Sh. पुरूची रायस्पोषमभिसंव्ययिष्ये Gdh. ०जीयान्.

3. Gdh. इत्यहतं वासयुग्ममहतम्

4. वास आच्छाद्या०. .मंगलान्याशासयेत् is put in Sh.'s footnote, while his text reads वास. परिवत्ते यदि पशुमालभते— शन्नो मित्र इति पाणी प्रक्षाल्य यथार्थमालभनमिलेके.

5. Cf. MānGṛ I. 9. 27.

6. F. गृह्ये०, Sh. ०द्वादशः खण्डः.
One of Gdh.'s mss. includes the Alaṅkaraṇa within the Madhuparka, for at the conclusion of both these ceremonies it bears the colophon इति मधुपर्क समाप्त.

7. Sh. सु०.

8 Sh. ०महताऽना०.

9. E. F add स्वाहा.

10 E appends स्वाहा or स्वा० to every deity up to पर्जन्याय.

11. Sh. E Gdh. पङ्क्त्यै (E. क्तै).

12. Sh. कुह्वे.

13. Gdh. आज्यशेषेण पाणी प्रलिप्येते न संपातशेषेण.

14. E. ०णिं.

15 Sh. कन्यामुखं.

संमार्ष्टि[1] —

त्रियां करोमि पतये देवराणाᳶ श्वसुराय[2] च ।
रुच्यै त्वाग्निः सᳶसृजतु रुचिष्या पतये भव ॥
सौभाग्येन त्वा सᳶसृजत्विळा देवी घृतपदीन्द्राण्यग्नाय्यश्विनी[3] राट् ।
वागिळा द्यौररुन्धती ॥

इति च[4] ॥ २ ॥ सर्वाणि[5] वादित्राण्यभिमन्त्रयते—
या चतुर्धा प्रवदत्यग्नौ या वाते या बृहत्युत ।
पशूनाᳶ यां ब्राह्मणे न्यदधुः शिवा सा प्रवदत्विह ॥

इति ॥ ३ ॥ सर्वाणि[6] वादित्राण्यलंकृत्य[7] कन्या प्रवादयते—
शुभᳶ वद दुन्दुभे सुप्रजास्त्वाय गोमुख ।
प्रक्रीडन्तु कन्याः सुमनस्यमानाः सहेन्द्राण्या सवयसः सनीडाः ॥
प्रजापतिर्यो वसति प्रजासु प्रजास्तन्वते सुमनस्यमानाः ।
स इमाः प्रजा[8] रमयतु प्रजात्यै स्वयं च नो रमताᳶ शं दधानः[9] ॥

इति ॥ ४ ॥ प्रवदन्ति[10] कारालिकानि[11][12] ॥ ५ ॥ कन्यामुदकेनाभिषिञ्चेत् ॥ ६ ॥

इति वाराहगृह्ये त्रयोदशं खण्डम्[13] ॥

---

1 Perhaps the ācārya of the bride. Gdh. आचार्यः स्वहस्तौ प्रलिपेत्.

2 Sh. श्वशु॰.

3. E. Gdh. ॰पदीरिंद्रा॰, F. घृतवंतीरिंद्रा॰.

4. Sh. E. omit च.

5. Sh. अथ सर्वाणि.

6. Sh. adds वा.

7. Gdh. अलंकृत्य मालाघृतपुष्पैः.

8. Sh इमां प्रजां.

9. Sh. संदधातनः.

10. E. Gdh. omit प्रवदन्ति.

11. Sh. omits रा.

12. Gdh. प्रवादयन्ति क्रीडनावादनानि.

13. F. गृह्ये॰, Sh. ॰एकादश. खण्डः, E. ॰द्वादशं खण्डम्.

[अथ विवाहकर्म]

खे रथस्य खेऽनसः खे युगस्य शतक्रतोः ।
अपालामिन्द्रस्त्रिः[2] पूर्त्व्यकृणोत्सूर्यवर्चसः ॥

इत्यथास्या अहतं वासः प्रयच्छति[3] ॥[4] १ ॥ अथैनां दर्भशुल्वेन[5] संनह्यति—

सं त्वा नह्यामि पयसा पृथिव्याः सं त्वा नह्याम्यद्भिरोषधीभिः ।
सं त्वा नह्यामि प्रजया धनेन सह संनद्धा सुनुहि भागधेयम् ॥

इति ॥[6] २ ॥ अथैनां वाससोऽन्तं ग्राहयित्वाऽभ्युदानयति[7]—

अघोरचक्षुरपतिघ्न्येधि । एहि शिवा पशुभ्यः सुमनाः सुवर्चाः[8] ।
दीर्घायुपत्नी प्रजया स्वर्विदिन्द्रप्रणयीरुप नो वस्तुमेहि ॥

इति ॥[9] ३ ॥ समूहनोल्लेपनोद्धनननावेक्षणमित्यग्निकाले भूमिसंस्कारा-

1 Gdh. deals at length with some very important preliminaries These I quote here in brief तत. कन्यापक्षीया. वरं कन्यासमीपे निन्युः । मंत्रघोषेण ।...ओं समंजन्तु विश्वे देवा .. [RV X 85. 47] इति मंत्रेण वधूवरौ परस्परं संमुखं गच्छेत् । तिष्ठेत्पूर्वाभिमुखो दाता वरः प्रत्यङ्मुखो भवेत् । मधुपर्कार्चितायैना तस्मै दद्यात्सदक्षिणाम् ॥ .. पत्नी हस्त उदकपात्रं गृहीत्वा देवस्य त्वा सवितु· प्रसवे . इति समुच्चार्य. वरहस्ते कन्याहस्तं कांस्यपात्रावच्छिन्नधारया. . पुष्पफलाक्षतायुक्तं क्षिपेत् ।.. ...द्यौस्त्वा ददाति पृथिवी त्वा प्रतिगृह्णाति इत्युक्त्वा वर· कन्यां स्पृशेत् । ..यावो भूमिर्महिष्यो वाजिनोऽपि दद्यात् । स्वर्णमणीनपि । ततो वर इति मंत्रमुच्चारयेत्—क इदं कस्मै अदात । कामः कामायादात् । कामो दाता कामः प्रतिग्रहीता । कामाय त्वा प्रतिगृह्णामि कामैतत्ते इति ।...समाना वा आकूतानि. देवभाग यथा पूर्वे संजानाना उपासते । वामहस्ते गृहीत्वा ता प्रदत्तामेव वर· अघोरचक्षुरपतिघ्न्येधि इत्युक्त्वा क्रामन्ति गृहात् । ततो वरस्य वस्त्र ददाति । आदावभिषेकं करोति । हिरण्यगर्भ इति तिसृभि. प्रत्यृचम् । पश्चाद् वस्त्र प्रयच्छति । वरो मंत्रं जपति—खे रथस्येति. (Cf. MānGr 1. 8. 2-10)

2 E अपालामंत्रस्त्रि..

3 Gdh अथ वरस्यैवाहतं वास प्रयच्छति.

4 Cf. MānGr I. 8 11.

5. The mss शुल्वेण

6. Cf MānGr. I. 11. 6.

7. Gdh. भर्त्ता भार्याया वस्त्रस्य पल्लवं गृहीत्वा अभ्युदानयति । कराभ्यामुत्क्षिप्यानयति । होमस्थानं प्रेतीत्यर्थः. (Cf. MānGr I. 11. 5)

8. F. ०वचाः.

9. Cf. MānGr. I. 10. ६.

10. E. adds खनन.

न्सर्वत्र यथानिमित्तम् ॥ ४ ॥ पश्चादग्नेः[1] कटे तेजन्यां वा दर्भेष्वासनम् ॥ ५ ॥ शुचौ भूमिप्रदेशे शमीशमकश्यामाकानां प्रियङ्गुदूर्वागौरसर्षपाणां यथालाभगन्धसक्षीरफलवद्भ्यो वनस्पतिभ्यो हरित्पर्णकुशयवादिमिश्रान्यै-[3] र्या ओषधयः । समन्या यन्तीत्यनुवाकेन शं नो देवीरिति च सहिरण्यापो ऽभिमन्त्र्य प्रणीतोदकुम्भं प्रणयेत् ॥[6] ६ ॥ तं लाजाहुतीषु हूयमानासु भ्राता ब्रह्मचारी वोद्गृह्य धारयेद् दक्षिणतश्च ॥ ७ ॥ लाजान्संस्कृतान्श-मीपर्णमिश्रान्शूर्पेण दक्षिणतो माताऽन्या वाऽविधवा ॥ ८ ॥ आज्यं सं-स्कृत्य ब्रह्माणामामन्त्र्य समिधमाधायाघारावाघार्याज्यभागौ हुत्वा ॥[8] ९ ॥ अथ जुहोति—

अग्नये जनविदे स्वाहा । सोमाय जनविदे स्वाहा । गन्धर्वाय जनविदे स्वाहा ।

सोमः प्रथमो विविदे गन्धर्वो विविद उत्तरः ।

तृतीयो ऽग्निष्टे पतिस्तुर्यो ऽहं मनुष्यजाः ॥ स्वाहा ॥

सोमो ऽददद्गन्धर्वाय गन्धर्वो ऽददद्ग्नये ।

रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम् ॥

इति ॥[10] १० ॥ हिरण्यगर्भ[11] इत्यष्टाभिः प्रत्यृचमाज्याहुतीर्जुहुयात् ॥[12] ११ ॥ येन कर्मणेर्त्सेत्तत्र[13] जयाञ्जुहुयादिति जयानां श्रुतिः । त्वा[14] यथोक्तम्[15] ।

1 E adds दर्भे

2 E ०कुशास्कदर्भो यवा०.

3 E ०ज्यै०, other mss ०न्यै०
Cf VārŚr. Par Gṛhyapurusha kh 11 शुचौ भूमिप्रदेशे शमीशमकश्यामाकाना दूर्वाप्रियगुसर्षपाणां यथालाभं गंधांश्च क्षीरफलवद्भयो वनस्पतिभ्यो हरिपर्णः कूर्चं सदर्भो यवादिभिश्चान्यैर्या ओषधय. समन्या यन्तीत्यनुवाकाभ्या-मिमा आप. प्रभरामि शं नो देवीरिति च

4. MS II 7 13.

5 MS. II. 13. 1

6. This sūtra is missing in Gdh.

7 E ०मिश्रितान्.

8 Cf MānGr I 10 8.

9 The mss ०जन

10 Cf. MānGr I 10 8, 10

11 MS II 13 23.

12 Identical with MānGr. I. 10 10 (last line)

13 The mss ०च्छेत्त०.

14. This त्वा seems to refer to the one occurring in the following mantras.

15 Cf MānGr I. 10 11 ०तत्र जयान् जुहुयात् । जयाना च श्रुतिस्तां यथोक्तम्. Gdh. यत्र कर्मणा सिद्धिमिच्छेत्तत्र जया-होम. । अत. सर्वत्रानेन वाक्येन जयानां विधानम् । अभ्रातृभ्योपि (Cf. MānGr.

आकूत्यै त्वा स्वाहा । भूत्यै त्वा स्वाहा । कामायै त्वा स्वाहा । रत्यायै त्वा स्वाहा । समृधे[1] त्वा स्वाहा । समृद्ध्यै त्वा स्वाहा । ऋचा स्तोमम्[2] । प्रजापतये । भूः स्वाहा । अयाश्चाग्ने ऽसी[3]ति च ॥[4] १२ ॥ उत्तरतो ऽग्नेर्दर्भेषु प्राचीं कन्यामवस्थाप्य पुरस्तात्प्रत्यङ्मुख उपयन्ता देवस्य ते सवितुः प्रसवे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याꣳ हस्तं गृह्णाम्यहमसावित्यथास्या उपनयनवद्धस्तं गृह्णाति नीचारिक्तमरिक्तेन—

गृह्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासत् ।
भगो अर्यमा सविता पुरन्धिर्मह्यं त्वादुर्गार्हपत्याय देवाः ॥
ऊर्ध्वा वाक्समभवत्पुरा देवासुरेभ्यः ।
यां त्वा विश्वस्य भूतस्य प्रागायाम्यस्या अग्रतः ॥
सरस्वति प्रेदमव सुभगे वाजिनीवति ।
येन भूतꣳ समभवद्येन विश्वमिदं जगत् ।
तामद्य गाथां गास्यामो[5] या स्त्रीणामुत्तमं मनः ॥
सा त्वमस्यमो ऽहममो ऽहमस्मि सा त्वम् ।
द्यौरहं पृथिवी त्वं बृहदहꣳ रथन्तरं त्वम् ।[6] रेतो ऽहमस्मि रेतोधृक्त्वम् ॥
सामाहमस्मि ऋक्त्वं मनो ऽहमस्मि वाक्त्वम् ।
सा मामनुव्रता भव सा मामनुप्रजायस्व ॥
प्रजाꣳ सृजावहा उभौ पुꣳसे पुत्राय कर्तवे ।
श्रियै पुत्राय वेयवेह (?) सूनृते ॥

com. भ्रातृव्यवानपि) एता जुहुयात् । ओं आकूत्यै त्वा स्वाहा...एतैर्मन्त्रैर्यथोक्रमित्यनेन एतदाह—एता एव तु, आकूतायेति न जयाः [यया] शाखान्तरपठितविवाहे.

1. The mss. समिधे (E. F. दे).
2. MS. II. 7. 1.
3. MS. I. 4. 3.
4. Cf. MānGṛ I. 10. 11.
5. E. ॰वो.
6. Gdh. omits this line.
7. The mss. ॰वहावु॰ So also VārŚr. Par.
8. So also VārŚr. Par. Prāyaścitta kh. 3 p. 213 स्नातां पत्नीं लोकमुपवेश्य हस्तमन्वारभ्य जपेत्—सा त्वमस्यमोहममोहमस्मि सा त्वमावेह सꣳरभावहे प्रजावहै प्रजा सृजावहावुभौ पुꣳसे पुत्राय कर्त्तवै श्रिये पुत्राय वेयवेह सूनृत इति. E. Gdh. हेतवेह. Cf. JaimGṛ. I. 20 पुंसे पुत्राय वेत्तवै.

इति ॥[1]१३ ॥ प्रदक्षिणमग्निं परिणयेत् ॥[2]१४ ॥ पश्चादग्नेर्दर्भेष्वश्मान-मवस्थापयति—

आतिष्ठेममश्मानमश्मेव त्वꣳ स्थिरा भव ।

कृण्वन्तु विश्वे देवा आयुष्टे शरदः शतम् ॥

इति ॥[2]१५ ॥ अत्रैवास्या द्वितीयꣳ वासः प्रयच्छति ॥[3]१६ ॥ उपर्य-ग्नावञ्जलौ लाजान्[4]भ्राता ब्रह्मचारी वोपस्तीर्णं आवपेत् ॥[5]१७ ॥ तानभिघा-रितानविच्छिन्दती जुहुयात् । कर्तानुमन्त्रयेत[6]—

इयं नार्युपब्रूते लाजानावपन्तिका ।

दीर्घायुरस्तु मे पतिरेधन्तां ज्ञातयो मम ॥

अर्यमणं नु देवं कन्याग्निमयक्षत[7] ।

सो ऽस्मान्देवो ऽर्यमा प्रेतो मुञ्चातु मामुत ॥ स्वाहा ॥

इति ॥[8]१८ ॥ वीरसूर्जीवपत्नीर्भूयासमिति सर्वत्र वाचयेत् ॥ १९ ॥

तुभ्यमग्ने पर्यणयꣳ सूर्याꣳ वहतुना सह ।

पुनः पतिभ्यो जायां दा अग्ने प्रजया सह ॥

इति द्वितीयं परिणयेत् ॥[8]२० ॥ एवमेव तृतीयम् । अवस्थापनप्रभृति समानम् । पूषणं नु देवम् । वरुणं नु देवमिति होमौ ।[9] कन्याग्निमयक्षतेति समानम् ॥[10]२१ ॥ कामेन चतुर्थीं पूरयित्वा द्विरभिघार्योत्तरार्धपूर्वार्धे जुहु-यात् ॥ २२ ॥ अथैनां प्राचीꣳ सप्त पदानि प्रक्रमयति—एकमिषे विष्णुस्त्वां नयतु । द्वे ऊर्जे । त्रीणि रायस्पोषाय । चत्वारि मायोभवाय । पञ्च प्रजाभ्यः । षडृतुभ्यः । सप्त सप्तभ्यो होत्राभ्यः[11] ॥ विष्णुस्त्वां नयत्विति द्वितीयप्रभृत्यनु-षजेत् । सखी सप्तपदी भव सख्यं ते गमेयꣳ सख्यात्ते मा रिषमिति[12] सप्तम

1 Cf MānGr I. 10. 15.

2 Cf MānGr I. 10. 16

3 Cf. MānGr. I. 11. 4.

4 E लाजा.

5 Cf MānGr I. 11. 11

6. E. °यते.

7. The mss °क्ष°.

8 Cf MānGr. I. 11. 12

9. For पूषण नु देवं होमौ E has वरुणं पूषण नु देवं

10 Cf MānGr. I 11 13

11 For सप्तभ्यो होत्राभ्य. E. reads सप्त-होताभ्य..

12 Gdh गमेयं तेन सख्या मा युषं [योषम्].

एनां प्रेक्षमाणां समीक्षते ॥[1] २३ ॥

प्र त्वा मुञ्चातु वरुणस्य पाशाद्येन त्वाबध्नात्सविता सुशेवः ।

धातुश्च योनौ सुकृतस्य लोके इष्टा सं सह[2] पत्या भूयासम् ॥

इति शुल्वं विस्रंस्योदकुम्भेन मार्जयन्ते—पुनन्तु मा पितर[3] इत्यनुवाकेन । आपोहिष्ठीयेनेत्येके ॥[4]२४ ॥

सुमङ्गलीरियं वधुरिमां समेत्य[5] पश्यत ।

सौभाग्यमस्यै दत्त्वा यथार्थं[6] विपरेतन ॥

इति ॥[7]२५ ॥ स्थालीपाकेन शेषो व्याख्यातः ॥ २६ ॥ पृथक्त्वेत् (?) । येन द्यौरुग्रेत्येवंप्रभृतय उद्वाहे होमाः स्युः । नापाणिग्रहणे लाजाः । समानं प्रक्रमणं मार्जनं च ॥[9]२७ ॥

इति वाराहगृह्ये चतुर्दशं खण्डम्[10] ॥

---

1. Cf. MānGr. I. 11. 18.
2. E. इष्य सह सं.
3. MS. III. 11. 10.
4. Cf. MānGr. I. 11. 20, 26
5. Gdh. समेत.
6. Gdh. यथास्तं.
7. Cf. MānGr. I. 12. 1
8. MS. II. 13. 23.
9. Cf. MānGr. I. 11. 14.
Gdh. takes no notice of the last two sūtras, but simply goes on with some practices left unnoticed by the Sūtrakāra · [कन्या] पितृगृहे तत्रैव सीमन्तं करोति त्रिश्येतया शलल्या ।... ततो वर आचार्याय चैव तु सवत्सां गां दद्यात् ।...तत. त्रिरात्रं दम्पती स्याताम-क्षारलवणाशिनौ । एकपात्रे सदाश्नीयात् । .. (Cf MānGr. I 12. 2, 7 अत्रैव सीमन्तं करोति । त्रिश्येतया शलल्या...॥ उभौ सह प्राश्नीत.).
10. E. ०वाराहसूत्रगृह्ये षोडशं खंडम् । शुभं भवतु ॥
F. ०चतुर्दशमं खंडम्.

[अथ रथारोहणम्[1]]

अङ्कौ न्यङ्कावभितो रथं ये ध्वान्ता[2] वाता अग्रमभि ये संपतन्ति ।
दूरेहेतिः पतत्री वाजिनीवांस्ते नो ऽग्नयः पप्रयः पारयन्तु[3] ॥
इति चक्रमभिमन्त्रयते ॥[4] १ ॥
सुकिंशुकं शल्मलिं विश्वरूपं हिरण्यवर्णं सुधुरं सुचक्रम् ।
आरोह सूर्ये अमृतस्य पन्थांस्तेन याहि गृहान्स्वस्ति ॥
इत्यारोपयेत्[5] ॥[6] २ ॥
उप मायन्तु देवता उप ब्रह्म सुवीर्यम् ।
उप क्षत्रं च यद्बलमुप मामैतु यद्बलम् ॥
इति प्रयास्यन्जपति ॥[7] ३ ॥
अनु मायन्तु देवता अनु ब्रह्म सुवीर्यम् ।
अनु क्षत्रं च यद्यशमनु मामैतु यद्यशम् ॥

इति प्राश्वं प्रयाप्य प्रदक्षिणमावृत्य यथार्थलक्षण्यं वृक्षं चैत्यं वोपतिष्ठेत ॥[8] ४ ॥ नमो रुद्रायैकवृक्षसद इत्येकवृक्षे जपति । ये वृक्षेषु शष्पिञ्जरा[9] इति च ॥[10] ५ ॥ नमो रुद्राय चतुष्पथसद इति चतुष्पथे । ये पथां पथिरक्षय इति च ॥[11] ६ ॥ नमो रुद्राय श्मशानसद इति श्मशाने । ये भूतानामधिपतय

1. Gdh notes the following preliminaries इदानीं भर्तृगृहं पुण्याहे गच्छेत् । .तत्राहतेन च वाससा दर्भैर्वा रथं संमार्ष्टि प्रथमं दक्षिणं पश्चाद् वामम् । तत्र युञ्जन्ति ब्रध्नं (MS III 12. 18) इत्यश्वाभिमंत्रणे विनियोग:. Cf. MānGr. I. 13 1–3
2. VārŚr. ms. (p 131) ध्वांता.
3 In VārŚr. ms. (ib.) the red ink corrections are रथं यौ ध्वांतं वाताग्रमनुसंचरन्तौ । दूरेहेति पतत्रीरिंद्रियावान् ते नो॰.
4 So also the VārŚr. ms. (ib.) Cf. MānGr I 13. 4.
5. According to Gdh it is either the adhvaryu or the yajamāna who helps the bride to get into the chariot.
6. Cf. MānGr. I. 13. 6
7. Cf. MānGr. I. 13. 8.
8. Cf MānGṛ I. 13. 7.
9. MS. II. 9. 9.
10. Cf. MānGṛ. I. ¯3. 11.
11. Identical with MānGṛ. I. 13. 13.

इति च ॥[1] ७ ॥ नमो रुद्राय पात्रसद इति पिबन् । ये अन्नेषु विविध्यन्तीति[2] च ॥ ८ ॥ ये तीर्थानीति[2] तीर्थे ॥[3] ९ ॥ यत्रापस्तरितव्या आसीदति—

समुद्राय वयुनाय सिन्धूना पतये नमः ।

नदीनाꣳ सर्वासां पित्रे जुहुतां विश्वकर्मणे । विश्वहादाभ्यꣳ हविः[4][5] ॥

इत्यप्सूदकाञ्जलीञ्जुहुयात् ॥[6] १० ॥ यावताꣳ सखायानꣳ स्वस्तिमिच्छेत्तावत उदकाञ्जलीञ्जुहुयात्—अमृतमास्ये जुहोम्यायुः प्राणे प्रतिदधामि । अमृतं ब्रह्मणा सह मृत्यु तरेम । प्रामहादितीष्टिरस्यदितिरेव मृत्युन्धयमिति त्रिराचामेत् ॥[6] ११ ॥ द्विः परिमृजेत् ॥[6] १२ ॥ यद्यक्ता शम्याणिर्वा रिष्येत तत्रैवाग्निमुपसमाधायाग्नेयेन स्थालीपाकेनेष्ट्वा जयप्रभृतिभिश्चाज्यस्य पुरस्तात्स्विष्टकृतः ॥[8] १३ ॥

[अथ गृहप्रवेशः]

अपरस्याह्नः संधिकाले गृहान्प्रपादयेत् ॥[9] १४ ॥ रथाद्यौपासनात्संततामुलपराजीꣳ स्तृणाति ॥[10] १५ ॥ तयाभ्युपैति ॥[11] १६ ॥

गृहानहꣳ सुमनसः प्रपद्ये ऽवीरघ्नी[12] वीरवतः सुशेवा ।

इराꣳ वहन्ती घृतमुक्षमाणाꣳस्तेष्वहꣳ सुमनाः सꣳविशामि ॥

इत्यभ्याहिताग्निꣳ सोदकꣳ सौषधमावसथं प्रपद्ये[त] । रेवत्या रोहिण्या यद्वा पुण्योक्तम् ॥[13] १७ ॥ आनडुहे चर्मण्युपविश्य ॥[14] १८ ॥ [15]अथास्या ब्रह्म-

1 Identical with MānGr I 13 12

2 MS II 9 9

3 Cf MānGr I 13 14

4. The mss जुहुत्वा

5 Cf MS II. 10. 6 विश्वाहादाभ्यꣳ हवि

6 Cf MānGr I. 13. 15

7 F ०च०.

8 Cf MānGr I. 13 17

9 Cf MānGr. I 14 1

10 Cf MānGr. I 14 4, 5.

11. Cf. MānGr I 14. 5

12. Thus corrected The verse occurs in an incorrect form in all Gṛhya-sūtras Our mss read सुशेवान्, वहतीर् (or वहन्ति), उक्षमाणास्, सविशाम The emended verse presents a fine parallelism between the attributes of गृहान् and अह—गृहान् सुमनस , अह सुशेवा । गृहान् वीरवत , अह अवीरघ्नी । गृहान् घृतमुक्षमाणान्, अह इरा वहन्ती

13 Cf MānGr I 14 6

14 Cf MānGr I 14 7

15 Henceforth Sh. reverts to the Vārāha text.

चारिणं जीवपितृकं जीवमातृकमुत्सङ्गमुपवेशयेत् ॥[1] १९ ॥ फलानामञ्जलिं पूरयेत्तिलतण्डुलानां[2] वा ॥[3] २० ॥ अच्युता ध्रुवा ध्रुवपत्नी ध्रुव पश्येम विश्वत इति ध्रुवं जीवन्तीं सप्तर्षीनरुन्धतीमिति दर्शयित्वा प्राजापत्येन स्थालीपाकेनेष्ट्वा जयप्रभृतिभिश्चाज्यस्य[4] पुरस्तात्स्विष्टकृत आज्यशेषे दध्यासिच्य दधिक्राव्णो अकारिषमिति[5] दध्नः पुमांस्त्रिः[6] प्राश्नाति ॥[7] २१ ॥

चक्रमिर्वानडुहः[8] पदं मामेवान्वेतु ते मनः ।
मा च पश्यन्ति सूर्यं च मा चान्येषु मनस्कृथाः ॥[9]
चाक्रवाकं संवसनं[10] तन्नौ[11] संवननं कृतम् ॥

इत्यवशिष्टं जायायै[12] प्रयच्छति ॥[13] २२ ॥ तूष्णीं सा प्राश्नाति ॥[13] २३ ॥ संवत्सरं मुदा तौ ब्रह्मचर्यं चरतः । द्वादशरात्रं त्रिरात्रमेकरात्रं वा ॥[14] २४ ॥ एवमेव चतुर्थ्यां कृत्वा हिरण्यगर्भ[15] इत्यष्टाभिः स्थालीपाकस्य हुत्वा जयप्रभृतिभिश्चाज्यस्य पुरस्तात्स्विष्टकृतः ॥ २५ ॥ अथास्याः सव्येऽंसे पूषा ते ग्रन्थि ग्रथ्नात्विति[16] वाससो ग्रन्थिं क्रियमाणमनुमन्त्रयते ॥ २६ ॥ चतस्रोऽविधवाः कुर्वन्ति । ताभ्यो हिरण्यं ददाति ॥ २७ ॥ संवत्सरं न प्रवसेत् । द्वादशरात्रं त्रिरात्रमेकरात्रं वा ॥ २८ ॥

इति[17] वाराहगृह्ये पञ्चदशं खण्डम्[18] ॥

---

1 Cf MānGr I 14 8
2 Sh ०तण्डुलान्
3 Cf MānGr I 14 9
4 Sh ०श्चाज्य
5 Sh ऽकारिषम् F and VāiŚr p 15 अकार्षम्, and again p 17 अचार्षम् MS I 5 1
6 Sh omits पुमान्
7 Cf MānGr I 14 9-12
8 Sh चक्रीमिषाऽ०
9 Sh adds सोमेनादित्या
10. Sh संवनन
11 F तन्नो
12 Sh. पत्न्यै
13 Cf MānGr I 14 12
14 Cf. MānGr I 14 14 Sh omits this and the following sūtras of this khanda In their stead he reads three Mānava sūtras (I 14 13 15).
15 MS II. 13 23
16 MS I 1 2.
17. F omits इति.
18 Sh does not end the khanda here, but goes on with Garbhādhāna.

[अथ गर्भाधानम्[1]]

तौ संनिपातयतः[2] ।

अपश्यं त्वा मनसा चेकितानं तपसो जातं[3] तपसोऽभिभूतम् ।

इह प्रजामिह रयिꣳ रराणः प्रजायस्व प्रजया पुत्रकाम ॥

अपश्यं त्वा मनसा दीध्यानाꣳ स्वायां तनूꣳ[4] ऋत्विये नाधमानाम् ।

उप मामुच्चा[5] युवतिर्बभूयात्प्रजायस्व[6] प्रजया पुत्रकामे ॥

प्रजापते तन्वं मे जुषस्व त्वष्टा वीरैः सहसाहमिन्द्रः (?) ।

इन्द्रेण देवैर्वीरुधः सꣳव्ययन्तां[7] बहूनां पुꣳसां पितरौ[8] स्याव[9] ॥

अहं प्रजा अजनयं पृथिव्यामहं गर्भमदधामोषधीषु[10] ।

अहꣳ विश्वेषु भुवनेष्वन्तरहं प्रजाभ्यो बिभर्षि (?) पुत्रान् ॥

इति स्त्र्यादिव्यत्यासं जपतः[11] ॥[12]१ ॥ करदिति भसदभिमृशेत्[13] ॥[14]२ ॥ जनदित्युपरिजननम् ॥[15]३ ॥ बृहदिति जातः प्रतिष्ठितम् ॥[16]४ ॥

1 For Garbhādhāna (excepting इन्द्रेण देवैर्वीरुध बिभर्षि पुत्रान्) Sh gives the Mānava text (I 14 16-20, excepting the second half of 16c, and the whole of 16d)

2 Cf MānGr. I. 14 16 तौ संनिपातयेत्.

3 Gdh ऽभिजा०.

4 The mss. तनूम्.

5 F ०मुचा.

6 F. प्रजाय प्रजायस्व.

7. Sh. Gdh. संविदाना.

8. Sh. पितरः

9. Sh. Gdh स्याव, F. स्याम.

10 F ०मादधाम्यो०.

11. Gdh रात्रौ तृतीये प्रहरे ऽन्यस्मिन्वा धर्माविरुद्धे तौ दम्पती एकस्मिन्शयने सन्निपातयत । भार्या भर्तुरुपरि, भार्यामुपरि भर्ता स्वं स्वमपश्यन्निति । चुम्बनदशननखघातादिभिः सुखात्यप्राप्तये सकृत्पृष्ठावलम्बितयज्ञोपवीती गच्छेत् । गमनात् **पूर्वं पश्चाद्वा** अपश्य त्वा .. इत्यादीना मंत्राणा...गर्भाधानकर्मणि दम्पत्यो. पठने विनियोग । अपश्यं० पुत्रकाम इति पत्नी जपेत् ।. अपश्यं० पुत्रकामे इति पति । .. प्रजापते इत्युभयोर्जप ।. .अह प्रजा इति पतिर्जपेत्

12 Cf. MānGr I 14 16

13. Gdh इति प्रथम पति पत्न्या गुह्यं स्पृशेत् The sense of अभिमृशेत् is further brought out by BaudhGr. Paddhati (Panjab University ms 4326 p 29b) अस्या योनिं विवृणोति

14 Cf MānGr I 14 17

15 Gdh ओं अजनदिति पत्नी स्पृशेद् भर्तुर्गुह्यम् Cf MānGr I 14 18.

16 Gdh बृहदस्य रेतो देवता, रेतस्पर्शने विनियोग । ओं बृहदिति पति । जात प्रतिष्ठितं रेत· सिक्तमित्यर्थ . Cf. MānGr.

[अथ पुंसवनम्]

अथास्यास्तृतीये गर्भमासे पुंसा नक्षत्रेण यदहश्चन्द्रमा न दृश्येत[1] तदहर्वोपोष्याप्लाव्याहतं वास आच्छाद्य न्यग्रोधावरोहशुङ्गान्युं[2]दपेषं पिष्ट्वा[3] दक्षिणस्मिन्नासिकाछिद्र आसिञ्चेत्—हिरण्यगर्भः[4] । अद्भ्यः सम्भृत इत्येताभ्याम् ॥ ५ ॥ अथास्या दक्षिणं कुक्षिमभिमृशेत्—

पुमानग्निः पुमानिन्द्रः पुमान्देवो बृहस्पतिः ।
पुमानग्निश्च वायुश्च पुमान्गर्भस्तवोदरे[5] ॥
पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभौ ।
पुमांसं गर्भं जायस्व त्वं पुमाननु[6]जायताम् ॥

इत्येताभ्याम् ॥ ६ ॥

[अथ सीमन्तोन्नयनम्]

अथास्याः पञ्चमे षष्ठे सप्तमे वा गर्भमासे मं[7]ङ्गल्यैः स्नापयित्वा प्राजापत्येन स्थालीपाकेनेष्ट्वा जयप्रभृतिभिश्चाज्यस्य पुरस्तात्स्विष्टकृतः । पश्चादग्नेर्दर्भेष्वासीनायाः सर्वान्केशान्वि[8]प्रमुच्य

त्वमर्यमा भवसि यत्[9]कनीनां देवः स्वधावो गुह्यं बिभर्षि ।
अञ्जन्ति विप्रं[10] सुकृतं न गोभिर्यद्दम्पती[11] सुमनसा कृणोषि[12] ॥

इति नवनीतेन पाणी प्रलिप्य सर्वान्केशान्संप्रयौति ॥[13] ७ ॥ इन्द्राणी चक्रे[14] कङ्कतं स[15] सीमन्तं विसर्पतु [इति कङ्कतं गृह्णाति][16] ॥ ८ ॥ पुनः

I 14 19
With Garbhādhāna Sh concludes his 18th khanda

1 Sh ०श्यते
2 Sh ०ङ्गान् उ०
3 Sh omits पिष्ट्वा
4 MS. II. 7 15
5 Sh ०थोदरे
6. Sh. पुमानुप०
7 Sh मा०
8 Sh. Gdh विमु०.
9 Thus Gdh, other mss य
10. Sh. विप्रं.
11 Sh F सुकृत तपोभिर्य०, Gdh सुतं मनोभिर्य०.
12 Sh समनसा कृणोमि.
13 Cf MānGr I 15 1
14 Gdh adds केशप्रसाधनीं.
15 Sh Gdh. omit स.
16 Gdh. इन्द्राणीति . ककतग्रहणे विनियोग । इन्द्राणी चक्रे इत्यनेन गृह्णाति.

पत्नीमग्निरिति[2] [केशप्रसाधनं कुर्यात्][3] ॥[4] ९ ॥ शलल्या शमीशाखया सपलाशया[6]—

अन्तर्वती[7] पुमाꣳसं दीर्घं[8] जीवन्तꣳ शतायुषम् ।
दीर्घायुरस्या यः पतिर्जीवातु शरदः शतम् ॥

इति त्रिश्वेतया[10] सीमन्तं करोति ॥[11] १० ॥ अथास्याः[12] पतिर्द्वेधा केशान्बध्नाति—नीललोहितेन सूत्रेण जीवोर्णया वा ॥ ११ ॥

इति वाराहगृह्ये षोडशं खण्डम्[13] ॥

[अथ वैश्वदेवकर्म]

अथ वैश्वदेवं व्याख्यास्यामः ॥ १ ॥ तत्र सायंप्रातःप्रभृतीनामग्निहोत्रवत्परिसमुह्य परिस्तीर्य[14] पर्युक्ष्य[15] सायं प्रातः स्यादित्येके ॥ २ ॥ हवि-

1 F ॰मग्निम्. Sh omits this verse RV X 85. 39 It is to be noted that the mantra is not given sakalapāthena.

2 F omits इति

3 Gdh. पुनः पत्नीमददादायुषा सह वर्चसेति (but cf RV. ib) कंकतेन अनेन मंत्रेण केशप्रसाधनं कुर्यात्

4. Cf. MānGr. I 15 1

5 F. सह॰.

6 Sh. adds एकीकृत्य कङ्कतेन, F adds पूर्णपात्रेण नेति कंकेतेम.

7. Thus F., others ॰र्वत्नी.

8. Gdh. दीर्घजीवं.

9 Sh ॰ति

10 F त्रिग्वे॰

11 Cf MānGr I 15 1 Gdh ओं अन्तर्वत्नी शरदः शतमित्यनेन मन्त्रेण त्रिश्वेतया त्रिषु स्थानेषु श्वेतेन शमीशाखया सह पलाशशाखया एकीकृत्य तया शलल्या पूर्णचन्द्रे सह (?) पति भार्याया सीमन्त करोति

12 With अथास्या F stops.

13 Sh एकोनविंश॰ खण्ड

14 Sh puts पर्युक्ष्य before परिस्तीर्य.

15 Cf VārŚr. Par. Grhyapurusha kh. 1 तेन सायंप्रात प्रभृतीनामग्निहोत्रवत्परिसमुह्य परिस्तीर्य पर्युक्ष्य.

ष्यस्य वा सिद्धस्य वैश्वदेवः ॥[1] ३ ॥ अग्नये सोमाय प्रजापतये धन्वन्तरये वास्तोष्पतये विश्वेभ्यो देवेभ्यो ऽग्नये स्विष्टकृते च जुहुयात् ॥[2] ४ ॥ अवशिष्टस्य बलिं हरेत् ॥[3] ५ ॥ दधिमधुमिश्रस्याग्नये पुरस्तात्, यमाय दक्षिणतः[4], सोमाय पश्चात्[5], वरुणायोत्तरतः[6], मध्ये वरुणार्यमभ्यां[7] ब्रह्मणे[8] च । अग्नये पृथिव्यै वायवे ऽन्तरिक्षाय सूर्याय दिवे चन्द्रमसे नक्षत्रेभ्य इति ॥[9] ६ ॥ अद्भ्यः कुम्भदेशे ॥[10] ७ ॥ ओषधिवनस्पतिभ्यो मध्यदेशे[11] ॥[12] ८ ॥ कामाय । गृहपतये[13] इति शय्यादेशे ॥[14] ९ ॥ श्रियै च ॥[15] १० ॥ रक्षोजनेभ्यो ऽन्तः शरणे ॥[16] ११ ॥ आकाशायेति स्थलिकाण्डाभ्याम् (?) ॥[18] १२ ॥ तूष्णीं निष्क्रम्योपरि शरणे ॥[19] १३ ॥ कव्यं[20] प्राच्याम् ॥ १४ ॥ पितृभ्यः स्वधेत्यनुषजेत् ॥[21] १५ ॥ नम इत्यन्ते च ॥ १६ ॥ ये ब्राह्मणाः प्राच्यां दिश्यर्हन्तु[22] । ये देवा यानि भूतानि प्रपद्ये तानि मे स्वस्त्ययनं कुर्वन्त्विति । दक्षिणस्याम् । प्रतीच्याम् । उत्तरस्याम् । ऊर्ध्वायाम् ॥ ये ब्राह्मणा इति सर्वत्रानुषजेत् ॥ १७ ॥ स्नेहवदमांसमन्नं भोजयित्वा विदुषो[23] ब्राह्मणानर्थसिद्धिं[24] वाचयेत् ॥ १८ ॥

1 VārŚr Par Gṛhyapurusha kh 1 हविष्यस्य सिद्धस्य वैश्वदेव Cf MānGr II 12 1

2 Identical with VārSr Par (ib) Cf MānGr II 12 2

3 VārSr Par (ib kh 16) अवशिष्टस्य बलीर्हरेत Cf MānGr II 12 3

4 Cf MānGr II 12 13

5 Cf MānGr II 12 15

6 Cf MānGr II 12 14

7 VārŚr Par (ib) वरुणाभ्या

8 Cf MānGr II 12 16

9 Identical with VārŚr Par (ib)

10 Identical with VārŚr Par (ib) Cf MānGr II 12 4

11 VārŚr Par (ib) मध्यमा०

12 Cf MānGr II 12 5

13 It may be that कामाय and गृहपतये form one verse, the two i e Kāma and Gṛhapati being identified with each other

14 Identical with VārSr Par (ib)

15 Identical with VārŚr Par (ib) Cf KāthGr IV 14 5 स्थूणाया ध्रुवाया श्रियै हिरण्यकेश्यै वनस्पतिभ्यश्चेति

16 Identical with VārSr Par (ib)

17 VārŚr Par (ib) स्थलीकाडाक्या

18 Cf MānGr II 12 8

19 Cf KāthGr IV 14 10 उपरि शरणे वैश्रवणाय राज्ञे भूतेभ्यश्चेति

20 VārŚr Par (ib) कव्या

21 Identical with VārŚr Par (ib)

22 VārŚr Par (ib) ०र्हन्तो.

23. Sh विदिशो, but cf VārGr IV 26 विदुषो ब्राह्मणानर्थसिद्धिं वाचयेत्

24 Sh ०सिद्धं.

बलिहरणस्यान्ते यामाशिषमिच्छेत् तामा[शा]सीत ॥ १९ ॥ गृहपतिः—ओमक्षय्यमन्नमस्त्वित्याह ॥ २० ॥ भिक्षां प्रदाय सायंभोजनमेव प्रातराशेत् ॥ २१ ॥ विप्रोष्य गृहानुपतिष्ठेत् ॥ २२ ॥

इति वाराहगृह्ये सप्तदशं खण्डम्[1] ॥

इति वाराहगृह्यसूत्रम् ॥

1. Sh. °वैश्वदैविकः खण्डः.

APPENDIX I

A LIST OF VARIATIONS

BETWEEN

THE MĀNAVA TEXT OF SASTRY'S VĀRĀHA-GRHYA

AND

THE CORRESPONDING PASSAGES

IN

DR KNAUER'S EDITION OF THE MĀNAVA-GRHYA

In Sastry's edition of the Vārāha-Grhyasūtra the text for chapters 13-17 and a part of ch 18 is derived from a MānGṛ. ms. ch. I. 8, 10-13 and the first 7 (excepting one verse and a half, i. e. second half of 16c and the whole of 16d) together with the last 8 aphorisms of ch I. 14. For the use of a future editor of the MānGṛ. the variations from Dr. Knauer's edition are noted below

Dr. Knauer's MānGṛ.	Sastry's variants
I. 8	
3. प्राक्कूलान्	प्राङ्मूलान्
5. मङ्गल्यानि	मङ्गलानि
6. ,,	,,
10. जपन्त्याऽन्ताद्	जपत्यन्ताद्
11. सूर्यत्वचम्	सूर्यवर्चसे (var. lect.)

I 10

1	चतुरस्रं	चतुरश्रं
	प्रणयेत् [तत्र ब्रह्मोपवेशनम्]	प्रणयेत् । तत्र ब्रह्मोपवेशनम् ।
2.	परिसमुह्य	परिसमूह्य
3	प्राक्तूलान्	प्राक्कूलान्
	अवस्तृणाति	अवस्तृणाति । अग्न्यायतनस्य मध्यमदक्षिणोत्तरप्रदेशेषु उदगग्रपूर्वाग्रान्परिधीन्परिदधाति ।
4	अपरमपरं	अपरमपर-
	लाजाधार्यांश्च	लाजाधारायाश्च
5	शमीमयीः शम्याः	शमीमयी शम्यां
7	युगतन्मनोऽधस्तात्	युगतस्तन्मना हस्तात्
	तिसृभिरद्भिः	तिसृभिः
	वाणशब्दं	वाणशब्दं
8.	याश्च आ	याश्चाग्रथा
	अततनन्त	ततन्थ
	आघारावाज्यभागौ	आघारावाघार्याज्यभागौ
	जनविदे	जनिविदे
	सोमाय दक्षिणार्धे	सोमाय जनिविदे स्वाहेत्युत्तरार्धे जुहोति सोमाय जनिविदे स्वाहेति दक्षिणार्धे ।
	जनविदे	जनिविदे
9.	युक्तो वह · ऋतुदवतां च	युनज्मि त्वेति जातवेदसं कामं युक्तो वहेति जातवेदसं भिषजं, विश्वाग्न इति चाग्निं नक्षत्रमिष्ट्वा नक्षत्रदेवतां अहः अहर्देवतां रात्रिं रात्रिदेवतां ऋतुं ऋतुदेवतां यजेत् । तिथिं तिथिदेवतां विरूपाक्षं च ।
11.	श्रुतिस्तां	श्रुतिस्थां
	कामाय	कामायै
12.	प्रत्यङ्कुपयन्ता	प्रत्यङ्मुखः
13.	प्रजापतिष्ट्वा नियुनक्तु	प्रजापतिस्त्वा नियुनक्ति
15a.	गृभ्णामि	गृह्णामि
	भगो अर्यमा	भगोऽर्यमा
b.	समवदत	समभवत्

	गाथां	गाथां
c	प्रेदमव	प्रेदमिव
	यां	या
	अस्याग्रतः	अस्या अग्रतः
e	वेधवै	वैधवै
16	आस्थापयति	आस्थापयत.
17ab	अवरोह सह पत्न्या ॥ आरोहस्व	अवरोहस्व

I 11

2	पूष्णे [ऽग्नये]	पूष्णे ऽग्नये
	वाभिनिरूप्य	वा निरूप्य
	भृज्ञति	प्रभृति
3	अविधवायै	अविधवायाः
6	सं त्वा पृथिव्याः सं त्वा	सं त्वा
	संनह्यते	संनह्यति
7.	अथैनानि	अथैनाम्
	इषीका अश्मानमाञ्जनं	इषीकाश्मानं अञ्जनं
8	चतसृभिः संनिष्कृष्य	चतसृभिः सतूलाभिरित्येकैकपातैक-कुभस्याञ्जनस्य सन्निकृष्य
9.	वध्वै	वध्वे
10.	पश्चादग्नेः	पश्चाद्
12	ता अविछिन्नैर्जुहुतः	तावच्छन्नतीर्जुहुयात्
a.	कन्या अग्निम्	कन्याऽग्निम्
	अस्मान्	इमां
	मामुतः	नामुतः
b	अग्नेः	अग्ने
14.	संततिहोमा.	सन्ततिहोमं
15	इत्यभ्यातानाः	इत्याभ्यातानाः
	प्राणादपानं	प्राणदपानं
16.	मङ्गल्ये	माङ्गल्ये
21.	स त्वं...ऽसीति च	मनो ज्योतिः त्रयस्त्रिंशत्तन्तवः अया-श्चाग्ने ।
23.	इति च हुत्वा	इति च हुत्वा इमं स्तनं मधुमन्तं धयायां प्रपीनमग्ने सलिलस्य मध्ये । उत्सञ्जुष-स्व मधुमन्तमूर्मिं समुद्रियं सदनमावि-वेश स्वाहा इति परिधिविमोकमभि-

		जुहोति । अन्नपते इत्यन्नस्य जुहुयात् ।
25	उपतिष्ठन्ते	उपतिष्ठते
26	कुम्भाद् मार्जयन्ते	कुम्भादुदकेन पुनन्तु मा पितर इत्यनुवाकेन मार्जयन्ते । आपोहिष्ठीयाभिरित्येके ।
	I 12	
3.	अभ्यञ्जन्ति	अभ्यञ्जति
	यशसे वहुपुत्राः	यशसे
	शिवा · चिरायुः	शिवा भव भर्तुः श्वशुरस्या वदायुष्मती श्वश्रुमती चिरायुः ।
4.	अवृजिनान्	वृजिनान्
	सखीभ्यः	सखिभ्यः
	वाहनेषु	वा जनेषु
5.	अथैनौ	अथैतौ
6.	जपन्ति	दंपती
	I. 13	
4	अङ्कू	अङ्कौ
	अभिमन्त्रयते	मन्त्रयते
5.	वीड्वङ्ग	विड्वङ्ग
7.	प्राङभिप्रयाय	प्राक् अभिप्रायाय
9.	चेदतिक्रामति इति जपति	चेत्यतिक्रामति
15a	विश्वाहा जुषतां	विश्वाह्यजुषतां
	उदकाञ्जलीन्	उदकाञ्जलिं
b.	रिष्टिरिति...परिमृज्याचामति	रिष्टिरिति जपेत्
16	यदि...सुत्रामाणमिति जपेत्	
17	शम्याणी	शम्याणि
	वध्वा सह	वध्वा
18	पन्थां	पथां
	इडयास्याग्रतः	इत्यस्याग्रतः
	येन येन	येन येन पथा
	I. 14	
1.	अपरस्मिन्नहः	अस्मिन्नहः
4.	संततामुलपराजिँ स्तृणाति	सन्तता मूलपराजितं स्तृतरथादध्योपसादनात्
5.	रथादध्योपासनात्	

6	सुशेवा	सुशेवाः
	वहन्ती	वहन्तीं
	सुमनाः सँवसाम	समना संविशाम
	प्रतिपद्यते	प्रतिपद्येत
	रोहिण्या	रेवत्या रोहिण्या
16b.	बाधमानां	नाथमानां
17	भसदम्	भसद्
18	उपजननम्	उपजनम्
19	जातं प्रतिष्ठितम्	जातम्

APPENDIX II

MANTRA INDEX

Such of the mantras as are not to be found in the Vedic Concordance or as show some variations therefrom are marked with an asterisk

APPENDIX III

WORD INDEX*

---

* The editor had compiled a complete word index, but on account of the shortage of funds it had to be cut down to the limit of six pages. The words occurring in the mantras have been entirely ignored